शास्त्रसंदेश-३४

# स्तोत्रसंदेशमाला

## श्रीनेमिनाथजिनस्तोत्राणि

८



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३४

# स्तोत्र संदेशमाला-८

## श्रीनेमिनाथजिनस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૮

## શ્રીનેમિનાથજિનસ્તોત્રાણિ


આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૧૯૩ + ૧૦

સ્તોત્ર : ૭૫ શ્લોક : ૧૩૧૭



: પ્રમાર્જના :

પૂ.આ.શ્રી દીવ્યકીર્તિસૂરિશ્વરજી મ.સા.

પૂ.પં.શ્રી શ્રુતતિલકવિજયજીગણી

પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી ભવ્યરત્નાશ્રીજી મ.સા.ના શિષ્યા

પૂ.સા. શ્રી પુણ્યરત્નાશ્રીજી મ.સા.



ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૭-૮ ના
## દ્રવ્ય લાભાર્થી

**શ્રી નવકાર આરાધના ભવન**

**શ્રી કોઠારી આરાધના ભવન**

**હાલોલ (જી. પંચમહાલ) જૈન સંઘે**

*જ્ઞાનદ્રવ્યથી કરેલ શ્રુતભક્તિની*

*શાસ્ત્રસંદેશ ભૂરિ ભૂરિ*

*અનુમોદના કરે છે.*

*ટ્રસ્ટીગણ ના અમો*

*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*

**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ
*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | श्रीमद्रैवतकाभिधाननग– | पू.आ.श्री सोमसुन्दरसूरि | १ |
| २ | जयश्रियं विश्वजितं स्मर– | पू.आ. श्री मुनिसुन्दरसूरि | ४ |
| ३ | यदुकुलतिलकः समृद्ध– | पू.आ.श्री रामचन्द्रसूरि | ९ |
| ४ | पदपावितभूमिमण्डलं, | पू.आ.श्री सोमप्रभसूरि | १२ |
| ५ | श्रीशैवेयं विनयविनत– | पू.आ.श्री सोमप्रभसूरि | १६ |
| ६ | श्रीरैवताद्रौ जिनपं स्तुवेऽ– | पू.आ.श्री जयसिंहसूरि | २१ |
| ७ | व्याख्यास्तु यस्य रदन– | पू.आ.श्री जिनपतिसूरि | २३ |
| ८ | श्रीशैवेय ! जयामेय !, | पू.आ.श्री चन्द्रसूरि | २५ |
| ९ | समुल्लसद्भक्तिसुराः | पू.आ.श्री ऋषिवर्धनसूरि | २८ |
| १० | श्रीहरिकुलहीराकरवज्र– | पू.आ. श्री जिनप्रभसूरि | ३० |
| ११ | मूर्त्तयस्ते क्व नेक्ष्यन्ते | पू.आ.श्री रत्नसिंहसूरि | ३३ |
| १२ | श्रीनेमिर्मुदमुज्जयन्तजग– | पू.आ.श्री विजयसेनसूरि | ३४ |
| १३ | सिद्धाञ्जनानीव तवाङ्ग– | पू.आ.श्री सुदर्शनसूरि | ४० |
| १४ | श्रीरैवताद्रिकमलापृथु– | पू. आ. श्री. रत्नाकरसूरि | ४३ |
| १५ | नेमिः समाहितधियां यदि | पू.आ.श्री विजयसिंहसूरि | ४६ |
| १६ | नमस्तुभ्यं जगन्नाथ !, | पू.आ.श्री हेमचन्द्रसूरि | ५० |
| १७ | सिद्धिवधू हृदयस्थल | पू.आ.श्री जयशेखरसूरि | ५१ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १८ | अभिलषित दान दक्षं | पू.आ.श्री जयशेखरसूरि | ५२ |
| १९ | अमन्दभन्दोदयकन्दसारं, | पू.आ.श्री रत्नप्रभसूरि | ५४ |
| २० | परमभक्तिपरीतपुरन्दर !, | पू.आ.श्री जयसुन्दरसूरि | ५७ |
| २१ | विमलरैवतकाचलशेखरः | पू.मु.श्री अभयतिलकगणि | ६० |
| २२ | कश्चित् प्रत्यानयति मनुजो | पू.मु.श्री रविसागरगणि | ६२ |
| २३ | विमलकीर्तिवधूकुलमन्दिरं, | पू.मु.श्री अमरहर्षगणि | ६७ |
| २४ | श्रीसमुद्रविजयान्वयो– | मुनिप्रवरश्री विनयहंसगणि | ७० |
| २५ | ....... वारं स सायं वरं। | पू.मु. श्री समयसुन्दरगणि | ७३ |
| २६ | सकलकालकलाकल– | पू.मु.श्री गुणनन्दी वि. | ७४ |
| २७ | कश्चित्कान्ताऽविरह ! | पू.मु.श्री राजसिंह वि. | ७६ |
| २८ | अविकलसकलकमलदल- | पू.मु.श्री कीर्तिमेरु वि. | ७८ |
| २९ | विषमविषमसररणरणकारं, | पू.मु.श्री कीर्तिमेरु वि. | ७९ |
| ३० | वरौषधीभिस्सुतरां विरा– | पू. मु.श्री आनन्दवल्लभ वि. | ८० |
| ३१ | ध्यात्वा गिरामधि– | पू.मु.श्री हेमविजय | ८१ |
| ३२ | नमः श्री नेमिनाथाय, | पू.मु.श्री मणिविजय वि. | ८६ |
| ३३ | विजित्यदुर्वारमनङ्गविभ्रमं, | पू.मु.श्री पद्मसुन्दर वि. | ८७ |
| ३४ | श्रीचौलुक्यमहीमहेन्द्र– | महामात्यश्री वस्तुपाल | ९२ |
| ३५ | जयत्यसमसंयमः | महामात्यश्री वस्तुपाल | ९४ |
| ३६ | जय जय यादववंशा– | सुश्रावक चतुर्भुज | ९६ |
| ३७ | श्री नेमिस्वामिनं नौमि | (श्री कल्याण कर्तृक ?) | ९८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ३८ | ॐ नमो विश्वनाथाय, | | १०० |
| ३९ | सच्छील संतर्जितताररक्ता– | | १०० |
| ४० | लोकोत्तरचरित्रौघ ! | | १०१ |
| ४१ | निजगुरुक्रमपङ्कजयामलं, | | १०३ |
| ४२ | नेमिनं जगतामीशं, मित्र | | १०४ |
| ४३ | जयोग्रादिजम्बालिनीनाथ– | | १०५ |
| ४४ | मुखकान्तिविनिर्जितस– | | १०६ |
| ४५ | महिमानल्प ! नेमीश ! | | १०७ |
| ४६ | शैवेयसार्वं सरसं सहस्र– | | १११ |
| ४७ | विहितनर्द्धितरङ्गो वर्द्धि– | | ११४ |
| ४८ | श्रीशैवेयं शिवश्रीदं, | | ११५ |
| ४९ | विमलकेवलकेलिपरायणं | | १२२ |
| ५० | सुविशालशिवालयजात– | | १२३ |
| ५१ | पूर्वे या रसरङ्गतश्चिरतरं | | १२४ |
| ५२ | इन्द्रोपेन्द्रो पुनर्नत्वा, | | १२५ |
| ५३ | मानेनानूनमानेन, नोन्न– | पू.आ.श्री शान्तिसूरि | १२६ |
| ५४ | हर्षादुल्लसितैः स्मराद् | | १२७ |
| ५५ | जय सिरिनेमिजिणंदचन्द ! | पू.आ.श्री सोमसुन्दरसूरि | १४४ |
| ५६ | जायवकुलसरवररायहंस, | पू.आ.श्री देवसूरि | १५१ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ५७ | मयनाहिसरिसविलसिर- | पू.आ.श्रीजिनवल्लभसूरि | १५२ |
| ५८ | नेमिरायमइजुअं थोसामि | पू.आ.श्री धर्मघोषसूरि | १५४ |
| ५९ | सुथिरसुरासुरसेहररयणप्प- | पू.आ.श्री चक्कसूरि | १५४ |
| ६० | अमियमऊहं नेमिं सुरराय- | पू.आ.श्री रत्नसिंहसूरि | १५५ |
| ६१ | सिरि नेमिनाह ! सामिय ! | पू.आ.श्री रत्नसिंहसूरि | १५७ |
| ६२ | सयलतियलोक्कतिलयं | पू.आ.श्री रत्नसिंहसूरि | १५८ |
| ६३ | जय सुरसेल-विभूसण ! | पू.आ. श्री जयसिंहसूरि | १६१ |
| ६४ | कुवलयदलसच्छायं, | पू.मु.श्री नेमिचन्द्र वि. | १६२ |
| ६५ | जय पणमंतसुराऽसुर- | | १६७ |
| ६६ | जय भव्वसत्तणेव्वाणका- | | १६८ |
| ६७ | मरगयमणिवन्नह तिन्न- | पू.आ.श्री जिनप्रभसूरि | १६९ |
| ६८ | जय जय नेमि जिणिंद ! | पू.आ.श्री रत्नसिंहसूरि | १७० |
| ६९ | जय जय नेमि जिणिंद | पू.आ.श्री रत्नसिंहसूरि | १७१ |
| ७० | सयल-जग-ललिय- | पू.उपा.श्री विनयप्रभ वि. | १७२ |
| ७१ | वंदामि नेमिनाहं, पंचम | पू. उपा. श्री कीर्तिराज वि. | १७९ |
| ७२ | तिहुयणजणमणचिंतियत्थ- | पू.मु. श्री कीर्तिराज वि. | १८१ |
| ७३ | जिणि निज्जिय जिणि | | १८४ |
| ७४ | सोहगसुंदरु घणलायन्नु | पू.आ.श्री विजयचन्द्रसूरि | १८५ |
| ७५ | सिद्धि जेहिं सइ वर | | १८९ |

पू.आ.श्री सोमसुन्दरसूरिविरचितः

श्रीगिरिनारगिरिमण्डन–

## १. ॥ श्रीनेमिजिनस्तवः॥

(शार्दूलविक्रीडित)

श्रीमद्रैवतकाभिधाननगभूभूषैकभूषामणे !,
श्रीमन्नेमिविभो ! भवारिभवभीनिर्भेदमेदस्वल ! ।
भक्तिव्यक्तिवशोल्लसद्बहुलमुद्रोमाञ्चचञ्चद्वपुः,
स्वामिन्नज्ञतमोऽपि विज्ञपयति त्वां किञ्चनाऽयं जनः ॥ १

निस्सीमोत्तमचङ्गिमा गुणगणः क्वासौ तवासौख्यहृन्
निस्सारा वचसां भराः क्व च ममेमेऽस्वच्छतुच्छात्मनः ।
एवं सत्यपि भक्तितः प्रलपितान्येतानि वाक्यानि मे,
देवाकर्णयितुं त्वमर्हसि यतो जातोऽसि सर्वंसहः ॥ २

एतावन्तमनेहसं त्वयि विभो ! याऽभूददृष्टे पुरा,
त्वत्पादाब्जदिदृक्षया परमयोत्कण्ठा गरिष्ठा मम ।
भूयो भूय इह त्वदीक्षणविधौ लावण्यवारान्निधे !
दृष्टेऽपि त्वयि सम्प्रति प्रतिदिनं सा वर्द्धते सन्ततम् ॥ ३

गङ्गाऽगान्मरुमण्डले स्थलभुवि प्रादुर्बभूवाम्बुजं,
मध्ये क्षारपयोनिधेः समुदभूत् कूपोऽमृताम्भोभृतः ।
तद् ध्वान्तौघमये निशीथसमये जज्ञे दिनेशोदयो,
यत्त्वं दृक्पथमागतोऽसि सहसा मेऽत्रापि काले कलौ ॥ ४

निःस्वः स्वर्णनिधिं यथाऽऽप्य लभते स्वान्ते नितान्तं मुदं,
तृष्णाक्रान्त इव प्रपामनुपमां घर्मातुरो वा तरुम् ।

शीतार्त्तो ज्वलितं हुताशनमिव स्थानं पथो वा च्युत-
स्तद्वत्त्वामुपलभ्य भाग्यवशतो जातोऽस्मि मोदास्पदम् ॥ ५

श्रीनेमे ! जगदेकनायक ! मुहुस्त्वां निर्निमेषेक्षणं,
पश्यन् श्यामतनुच्छविं जिनवर ! प्राज्यामृतश्रीपदम् ।
प्रावृट्कालघनाघनाभमनिभं सारङ्गवद्रङ्गभाग्,
नश्यत्तापतृषाभरव्यतिकरः सद्यः प्रपद्ये रतिम् ॥ ६

निर्नाथोऽपि सनाथतामहमगामद्य प्रभो ! भाग्यतः,
सम्प्राप्तेन जगत्त्रयाधिपतिना नाथेन नाथ ! त्वया ।
निष्पुण्योपि[विभो!]शरण्यवसते ! पुण्यैकपूतात्मनां,
धुर्यश्चाहमभूवमत्र भवतस्ते पादपद्मेक्षणात् ॥ ७

भूयो जन्मजरामृतिप्रभृतिकक्लेशोर्मिमालाकुले,
भीमेऽस्मिन् भववारिधौ निरवधौ मज्जन्तमेतं जनम् ।
किङ्कर्त्तव्यतया विमूढहृदयं हीनं च दीनाशयं,
स्वामिन् ! स्वीयतरीसमाननयनप्रक्षेपतः प्रीणय ॥ ८

गाढागाधभवापगापयसि ही हीनात्मनामग्रणी,
श्रीनेमीश्वर ! पश्यतोपि भवतो मज्जामि मज्जाम्यहम् ।
तन्मां तारय तारयाशु करुणापण्याऽऽपणाभ ! प्रभो !,
नोपेक्षा तव युज्यते यतिपते ! विश्वत्रयीतारक ! ॥ ९

यावद्देव ! तव श्रुतोक्तिसरसस्त्रोतस्विनीश्रोतसि,
क्रीडां क्वापि तनोत्ययं मम मनोमीनोऽतिहीनोद्यमः ।
रागद्वेषमदादिका बकगणा आदातुकामा इमं,
धावन्ति त्वरितं तदैव परितोऽप्येते हहा ! दुस्सहाः ॥ १०

लब्धाप्यत्र भवे तवेश ! सुकृतैराज्ञाविहीनात्मना,
स्वाधीनापि मया प्रमादवशतो नाराध्यते हाऽधुना ।
पश्चाद्दुर्गतिदुर्गकूपकुहरावर्त्तप्रपाते प्रभो !,
तत्तद्दुःखपरम्परापरिगतः स्थाताऽस्मि दुःस्थः कथम् ॥ ११

माद्यन्मृत्युदवानले जनिजरादुःखौघदुःश्वापदे,
भ्रामं भ्राममनेकधा भववने निस्सीमभीभाजने ।
श्रान्तोऽत्यन्तमहं महामयमये तत्त्वं जिनेशात्मनः
कारुण्याम्बुनिधे ! विधेहि सविधे वासं स्वदासस्य मे ॥ १२

....................................................................................

.................................................................................... ।

नेमे ! ज्ञानपदं न वेद्मि किमपि प्रज्ञाप्रकर्षोज्झितो,
ध्यातुं ध्यानमपि क्षमो नहि मनःस्थैर्याद्यभावादहम् ॥ १३

स्फूर्जज्ज्ञाननभोमणिप्रसृमरज्योतिः समुज्जृम्भिते,
विद्वन्मानसवारिभूरुहवने लीलां वितन्वन्नलम् ।
प्रोद्यत्तालतमालकज्जलकलच्छायैककायद्युते !,
श्रीनेमे ! वरचञ्चरीकतुलनामालम्बसे त्वं विभो ! ॥ १४

कालेऽस्मिन् कलिनामके सुरतरुः स्वर्गाङ्गणं सङ्गतः,
कामं कामगवी न वीक्षणपथेऽप्यायाति केषां क्वचित् ।
नष्टः कामघटोपि दृष्टिपदवीभ्रष्टश्च चिन्तामणि-
स्तेषामेष पदेऽस्ति सम्प्रति भवानेव प्रभो ! भूतले ॥ १५

एवं मन्दधिया मयाऽपि किमपि स्वामिन् स्तुतेर्गोचरं,
नीतोऽसि स्वमतिप्रकल्पितवचोन्यासैरसारैरपि ।

त्रैलोक्यैकगुरुं भवन्तमपरं याचे न किञ्चिद्वरं,
किन्त्वेका भवदीयपादयुगलोपास्तिर्दृढैवाऽस्तु मे ॥ १६

इतिगिरिगिरिनारोत्तुङ्गशृङ्गावतंसं,
जिनवरमिह नेमिं यो जनोऽनन्यचेताः ।
निजहृदयजभक्तिप्रेरितः स्तौति नित्यं,
शिवसुखमचिरेणाप्यश्नुतेऽसावनन्तम् ॥ (मालिनी) १७

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

श्रीगिरनारमण्डन-

## २. ॥ श्रीनेमिनाथस्तोत्रम् ॥

(उपजाति)

जयश्रियं विश्वजितं स्मरद्विषं पराभिभूयाजननादवाप यः ।
श्रीनेमिनं तं सुरराजपूजितं जगत्प्रभुं रैवतदैवतं स्तुवे ॥ १

स्तुतिं विधातुं तव यां न शक्तो
नेमे ! सुरेन्द्रोऽप्यहकं कथं ताम् ? ।
तथापि तत्सम्भविसत्फलस्य
लिप्सैव मां प्रेरयतीह बालम् ॥ २

यस्मिन् बभूवुस्तव नाथ ! नेमे ! दीक्षाऽवबोधावपुनर्भवश्च ।
तं रैवतं दैवतकोटिशस्यं स्तवीमि दिव्यार्थनिधिं गिरीन्द्रम् ॥३

न बाह्यमात्रैररिभिः प्रतापिताः
किन्त्वान्तरैरप्यखिलैरघात्मभिः ।
इमं सनाथं प्रभुणा त्वया गिरिं
श्रिता जना निर्वृतिमाश्रयन्त्यहो ! ॥ ४

कोटाकोट्यो विंशतिर्यस्य मूर्त्तेरम्भोधीनां जज्ञिरे वज्रमय्याः ।
सृष्टायाः श्रीब्रह्मनाकाधिपेन श्रीनेमिं तं रैवतेशं प्रणौमि ॥ ५
(शालिनी)

विश्वत्रयस्याऽपि तु दिक्चतुष्के हन्तुं प्रसर्पद्भवदुःखचक्रम् ।
विनिर्मितद्वादशमूर्त्तिमीडे नेमिं त्रिकल्याणकचैत्यसंस्थम् ॥ ६

स मङ्गलं रैवतशैलशेखरः श्रीनेमिनेता वितनोतु भाविनाम् ।
पादा यदीया दधते सुरद्रुतां जगत्त्रयीवाञ्छितसौख्यदायिनः ॥७

भास्वद्विभूतिर्गणनायकाश्रितो विलासपात्रीकृतसर्वमङ्गलः ।
रातु श्रियं शम्बरवैरिघातकृन्-
नेमिर्ज्जिनो वो जगदेकशङ्करः ॥ ८

मां रूपाभिरतिं त्वदेकशरणां नव्यप्रभां भूपजाम्
स्फूर्ज्जद्रागवशां चिरं परिचितां त्यक्त्वा सुधाकीर्गिरम् ।
मुक्तिं रूपविवर्जितां बहुतरैर्भोग्यां चिरत्नां कथं
निस्स्वामिच्छसि रागसंस्तवमुचं वाग्योगहीनां प्रभो ! ॥ ९
(शा.वि.)

इतीरितो यो नरनाथपुत्र्या चिरानुरागाचितराजमत्या ।
जगाम मोहं भगवान् वशी न स नेमिनेता शिवतातिरस्तु ॥१०
(वंशस्थ)

येनाञ्जनश्यामरुचाऽपि राजीमतीमनस्तन्मयभावमाप्तम् ।
रक्तं तदन्वत्यवदातमासीत्तं नेमिनेतारमहं प्रणौमि ॥ ११

यस्य प्रतापज्वलने बभूवुर्मदाः पतङ्गा इव विष्टपानाम् ।
तमप्यरिं कामभटं जिगाय यो नेमिनाथं शरणं श्रये तम् ॥ १२

नेमे ! बभासे द्युतिमण्डलं ते तनोः शितिस्निग्धतमं प्रसर्पत् ।
महार्णवाभं वरदेशनायां फेनायितं यत्र रदप्रभाभिः ॥ १३

तेषां मुधा क्लेशकरं जनन्या जन्माऽङ्गिनां भारकरं धरित्र्याः ।
जानन्ति दुष्कर्म्महता भवन्तं न ये भवन्तं प्रणमन्ति चेशम् ॥१४

संसारदुःखामयनाशनाय त्वमेव वैद्योऽसि जगत्त्रयेऽपि ।
त्वत्सङ्गमोपायजडाः कथं ही
प्राप्स्यन्ति तन्निर्वृतिशर्म तीर्थ्याः ? ॥ १५

बम्भ्रम्यमाणेन गतिष्वनारतं मया समग्रास्वपि चित्ररूपिणा ।
दुःखान्यनन्तान्यनुभूय बिभ्यता-
ऽधुना प्रपन्नोऽसि विभुस्ततोऽव माम् ॥ १६

पुनः पुनर्द्राग् दिवसः स पक्षो मासो मुहूर्त्तोऽस्तु स वत्सरश्च ।
त्वद्दर्शनं यत्र भवेद्विभो ! मे सर्वेष्टसौख्यप्रदवन्द्यसेवा ॥ १७

अर्थी शिवस्याहममुष्य दाता त्वमेव तेनाऽस्मि भवन्तमेव ।
नेमे ! शरण्यं शरणं प्रपन्नः प्रभूचितं तत् कुरु मे प्रसन्नः ॥१८

श्रीपुण्डरीकाऽचलमण्डनाय युगादिदेवाय नमोऽस्तु तस्मै ।
नैःश्रेयसश्रीरपि किङ्करीव सदा यदाज्ञावशतां दधाति ॥ १९

वन्दे चतुर्विंशतिमर्हतोऽ-ष्टापदावतारे ऋषभेश्वरादीन् ।
जगत्त्रयाभीष्टसुखप्रदानैः सुरद्रुमा ये भरते बभूवुः ॥ २०

प्रणौमि सम्मेतगिरीन्द्रतीर्थावतार-चैत्येऽजितनाथमुख्यान् ।
जिनेश्वरान् विंशतिमक्षरश्री-
शृङ्गारहारान् सुरनायकार्च्यान् ॥ २१

गच्छन् निर्वृतिमाजुहूः प्रियतमामेत्योग्रसेनौकसो
द्वारे वीक्ष्य विवाहडम्बरमिषान्मोहारिभूभृद्बलम् ।
भीतोऽरण्यसुयत्नमोचितपशुर्मन्ये प्रियां बान्धवां-
स्त्यक्त्वा पूत्कृतिकारिणो गिरिशिरः श्रीनेमिनाथोऽगमत् ॥२२
(शार्दूलविक्रीडित)

मत्वैतद्भुवनातिशायिसुभटी स्वं देवरं च द्विषो
मोहाद्यातु विमोच्य सङ्गतवती तत्रैव पत्यात्मनः ।
भेजे तेन सहैव निर्वृतिरमां नित्यां परानन्दभाग्
वन्दे राजमतीं सदा भगवतीं तां विश्ववन्द्यक्रमाम् ॥ २३
(शा.वि.)

यो भ्रातृजायार्पितनेमिवैद्योदितौषधैर्मोहगरं निरस्य ।
स्फुरत्प्रबोधः समतां स्वबन्धोर्लेभे स्तुवे तं रथनेमिसिद्धम् ॥२४

श्रीनेमिसाधुक्रमभक्तिलब्ध-दिव्यर्द्धिरिद्धातिशयप्रभावा ।
श्रीसङ्घरक्षा विहितावधाना
श्रेयोऽम्बिका यच्छतु सिंहयाना ॥ (इन्द्रवज्रा) २५

यत्रावलोक्य प्रभुणोज्जयन्तः पूतोऽभितो यं विदधे गिरीन्द्रः ।
शृङ्गेऽतितुङ्गेऽत्र पवित्रमूर्त्तिं प्रणौमि नेमेरवलोकनाख्ये ॥ २६

तनूद्भवं श्रीहरिजाम्बवत्यो-र्नेमेर्विनेयं जगदग्र्यसत्त्वम् ।
श्रीरैवताद्रेः शिखरेऽत्र लब्ध-
शिवं मुदा शाम्बमुनिं नमामि ॥ २७

अध्युष्टकोटीषु कुमारकाणां प्रभुर्यदूनां प्रति दैत्यशत्रोः ।
द्विधाऽपि यो वैरिगणं जिगाय
प्रद्युम्नसिद्धं प्रणमाम्यहं तम् ॥ २८

यस्तीर्थभक्त्या गतपापराशि-
श्चौरोऽपि देवश्रियमाप रम्याम् ।
निर्वाणमागामिभवे गमी स-
देयात्सुखं सिद्धविनायको मे ॥ (इन्द्रवज्रा) २९

कपर्दिसद्मेन्दुसहस्त्रबिन्दुगुहेभकुण्डप्रमुखाः परेऽपि ।
सहस्त्रलक्षाऽऽम्रवणादयश्च तीर्थप्रदेशाः सुखदा जयन्ति ॥ ३०

सर्ववस्तुकलनैकनदीष्ण ! ज्ञानसागरगुरो ! त्रिजगत्याः ।
उज्जयन्तगिरिशेखर ! नेमे ! विश्वरक्षणचणाय नमस्ते ॥ ३१
(स्वागता)

एवं रैवतशैलमौलिमुकुटश्रीनेमिनेतर्जग-
त्सर्वाभीष्टकरः स्तुतोऽपि मयका मुग्धस्तवेनाधुना ।
कारुण्यामृतवारिधे ! मम कृपापात्रस्य बोधिश्रियं
शुद्धां देहि जयश्रिया भवरिपोः स्याद् ब्रह्मलक्ष्मीर्यतः ॥ ३२
(शार्दूलविक्रीडित)

एवं नेमिजिनं जगत्त्रयपतिं श्रीरैवतालङ्कृतिं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ३३
(शार्दूलविक्रीडित)

पू.आ.श्री रामचन्द्रसूरिविरचितः

## ३. ॥ श्रीनेमिजिनस्तवः ॥

यदुकुलतिलकः समृद्धलक्ष्मीर्नरकनिरोधविधानबद्धकक्षः ।
जगतां धृतशङ्खचक्रपाणिर्दिशतु जिनः पुरुषोत्तमः शिवानि ॥१

स कविः खलु वास्तवं चरित्रं तव परिकीर्त्तयितुं कृताग्रहो यः ।
धिक् तांस्तु नरेन्द्रचन्द्रयोषिच्-
चरितमवास्तवमेव ये स्तुवन्ति ॥ २

समयोऽथ न पारभेदसङ्गी मतिसौहत्यकृते महामतीनाम् ।
इतरेषु रहः पुनस्तवेदं निखिलप्राणिगणेन नित्यमैत्री ॥ ३

समता कुत एव ते सहान्यैरुत्कर्षेऽपि मनांस्यपत्रपन्ते ।
यमिनां मृतपाद् गुणाधिकत्वे
महिमा कः कथिते प्रशंसितोऽस्तु ॥ ४

न तमांसि न वा रजांसि दृष्टिं पुरुषस्य प्रभवन्ति तस्य रोद्धुम्।
अनिशं खलु शासनाञ्जनं ते
सविधे यस्य विजृम्भते जिनेश ! ॥ ५

परपरिभावदीनदीक्षितेषु क्षितिनाथेषु यथार्थिनो भवन्ति ।
भवति यदि तथा भवेयुरस्मिन्
किमसुलभं भुवने तदास्तु वस्तु ॥ ६

न तपो न जपो न संवरो वा भवनाशाय विना त्वदुक्तमन्त्रात् ।
प्रगुणेष्वविशेषकारणेषु प्रसवति बीजमुपास्य नाम्बुसेकम् ॥७

करणोपचयो भवच्छिदायै स च साम्येन तदेतदात्मवश्यम् ।
किमियत्यपि मुक्तिकार्मणेऽसौ
भवदुक्ते भवति द्विषां विमोहः ॥ ८

उभयोरपि योग्यतापवर्ग्गं प्रति पुरुषस्य सुमेधसः स्त्रियाश्च ।
वपुरन्नमयं च योगभाजामपि तव सैष मुदे न कस्य पन्थाः ॥९

खलमनसो यदि मादृशोऽमी तदपि तवोचितमौचितुं विधातुम्।
विजनेषु महीधरेषु गुर्वीं
सलिलमुचो रचयन्ति किं न वृष्टिम् ॥ १०

त्वयि मयि न नाम कोऽपि भेदो यदि कृपां कुरुषे कृपास्पदेषु ।
सवितुर्ग्रहचन्द्रतारकाभ्यो भुवनविकासविलासतो विशेषः ॥११

व्रतमसिनिशितं चिरं दधानेष्वपि
विकृतिं क्वचिदीश ! वीक्ष्य काञ्चित् ।
दिशतस्तव मूलनाशमन्ये
कथय कथं तु कृपालुतां स्तुवीरन् ॥ १२

परिणाममशेषजन्तुवाचां दधदखिलान् सह संशयांश्च भिन्दन् ।
नहि केवलमेव केवलं ते वचनमपीश्वर ! केवलं तदेवम् ॥१३

विभवलवमदान्धनेत्रपात्रैरवगणितां क्वचिदर्थितां वहन्तः ।
तव वचनपवित्रताविरागं दधति वहन्त्यपरेऽपि रोषमुच्चैः ॥१४

धिक् तानि हहा पितंश्च तेषां ये भवतोऽपि विगाह्य तत्त्वसिन्धुम्।
घननिगडविशृङ्खलाङ्घ्रिपातं गगननिवेशितनेत्रमर्थयन्ते ॥ १५

विरचितगुरुकर्मवर्मभेदे निरवधिशर्मणि शाश्वतावलोके ।
श्रद्धा यदि जन्मकोटिलक्षैरपि
भवति त्वयि किं न नाम लब्धम् ॥ १६

पवनः खलु पावनो जडोऽपि द्विषतस्त्वां विबुधादपि ध्रुवं सः।
सततं तव यः पदाब्जपीठीमनुकूलत्वमुपेयिवानुपास्ते ॥ १७

विभवैः समयप्रभावकत्वादपि हृदयेन्द्रियसंवरो वरीयान् ।
तदिदं तव तत्त्वसूत्रकत्वं द्विषमपि कन्न चिरं चमत्करोति ॥१८

शक्तिर्यदि मानसं विजेतुं किमखिलदुःखगृहस्थचिन्तनेन ।
जनकजनककर्मणो वचोभिः
किमिह परैर्विभवार्जनावबोधैः ॥ १९

प्रवचनपरिधारिणोऽप्यमी ये विदधति कर्मसु तामसेषु वृत्तिम् ।
खलु तेषु बहिश्चरित्रमुख्यः सुगतिमपोहत एव ते निदेशः ॥२०

निवसति स जडेषु या न नाम श्रीलोलेषु दधाति नास्पदं च ।
शिवभूमीसखीं विना न सा श्रीः
पदयुगली तव लभ्यते महद्भिः ॥ २१

विसदृशमपि भावजातमेतद् युगपदशेषविशेषमीश ! बिभ्रत् ।
समवसृतिमही च शासनं च द्वयमपि सोदरतां ध्रुवं ददाति ॥२२

मयि शोकधनी प्रवासनी च प्रभवपराभवभारविक्लवस्य ।
भवति खलु जनस्य सौमनस्यं
तव वचनामृतविप्रुषां निषेकैः ॥ २३

अवर्त्मनि वचःपतेरपि गिरामसौ मादृशां
मलीमसदृशां ध्रुवं त्वयि क एव देवस्तव ।
तथापि सफलो मम स्तवनसम्भवोऽयं श्रमः
फलन्ति नहि देवताः किमुत भावनाः स्वाः सताम् ॥ २४

पू.आ.श्री सोमप्रभसूरिविरचितम्

यमकमयम्

# ४. ॥ श्रीनेमिजिनस्तोत्रम् ॥

पदपावितभूमिमण्डलं, स्वगिरा बोधितभूरिमण्डलम् ।
वदनास्तमृगाङ्कमण्डलं, नुत नेमिं जितदोषमण्डलम् ॥ १
(प्रबोधिता)

वलितः शिवसम्पदारुणक्रमणस्त्वं जिन ! पापदारुणः ।
विलयार्थमकोपदारुण-ज्वलनोऽर्त्तिकमलापदारुणः ॥ २
(प्रबोधिता)

(उपजाति)

प्रत्यूत सर्वं सहसारतेजस्तापं समेस्त्वं सहसाऽरतेऽजः ।
व्यघाः सुधावाक्यनिधानवद्यः,
पुंसामभीष्टं बहुधाऽनवद्यः ॥ ३

त्वं भिन्द्धि मे कामरसं सदेह, विराज्यऽनेकाऽमरसं स देह ।
यो वन्दितः पीवरमोदयेन, मनोरमोऽतीवरमोद ! येन ॥ ४

यस्ते गिरोऽकष्ट ! पपावनेशत् तस्मात् तमो विष्टपपावनेश ! ।
तेन स्मरश्चेभरदाऽवदातयशोऽऽघवल्ली भरदावदातः ॥ ५

तस्मै नमस्तेऽभवतादऽमाय !, येन प्रयत्नो भवता दमाय ।
चक्रे गरीयःकरुण ! क्रमेण, क्षिप्तानि कर्माण्यरुणक्रमेण ॥ ६

नयस्व मे सन्तमसं तनुत्वं, बुद्धिं सुसाधूत्तम ! संतनु त्वम् ।
भवान् शिवश्रीगलसज्जहार !, यः पापमिद्धाङ्ग ! लसज्जहार॥७

त्वयीश ! यः स्यान्नतिभागऽभीराऽ-
वाऽऽभाति तस्य प्रतिभा गभीरा ।

दत्ते च काऽमन्द–रमा–पदस्य,
शान्तस्य कामं दरमापदऽस्य ॥ ८

स त्वं तमोऽकाम ! धुनीहि तेन, जिते रसाला–मधुनी हितेन ।
वाक्येन यस्याऽपकृताऽमृतेन, दत्ताङ्घ्रिमाला सुकृताऽमृतेन ॥९

वीक्ष्याऽब्जिनीबान्धवनव्यधाम ! दवोपमक्रोधवन व्यधाम् ।
मुदं तवांऽहोरहिताननन्त दहन् यदुच्चैरऽहितानऽनन्त ॥ १०

त्वं संविदा चारु तमःकृशानोः, भियः सृजेशोरुतमः कृशानो !।
पयोदनिन्दाबुधराव यस्य, न्नऽयेऽघपङ्काम्बु धरावयस्य ! ॥११

शश्वज्जयाऽधीश्वर ! स त्वमिद्ध–प्रभाऽवशस्तारतपावनस्य ।
श्रेयस्तरो यस्य यशो बभासे, प्रभावशस्ताऽरत–पावनस्य ॥१२

अपाऽस्त मोहाऽनिकृते पराम, निरासको येन नतस्तवमीश ! ।
अपास्तमोहा–कृतेऽपराम, कृतोद्यमस्तं भवभीमसिन्धोः ॥१३

(उपेन्द्रवज्रा)

(रथोद्धता)

त्वत्पदौ नमत ईयुषः क्षमा–वास–राभसिकतामनागसौ ।
याऽलिके लगति नाऽशुभा तमो–
वासराभ ! सिकता मनागसौ ॥ १४

नाशमीश ! स यशोस्तपूर्णिमा– राजतार मम लम्भयाऽऽपदः ।
यस्य ते गुणकदम्बकं सदाऽराजताऽऽरममलं भयाऽऽपदः ॥१५

मोहमल्लमिह सम्पदा नमन्–मानवाऽरणमतेरऽयादिमम् ।
आन्तरारिनिकरे मम प्रभो !, मान–वारणमते ! रयादिमम् ॥१६

अवधि दोषततिर्भवता जवाद्, दूतसुवर्णगिरा विहतापदा ।
जिन ! सुरैः कृतजन्ममहः क्षमाऽऽ-
दूत सुवर्णगिराविहतापदा ॥ (द्रुतविलम्बित) १७

पदयुगं मनुजेन विनम्यतेऽमितकला वहता विनताऽऽवकम् ।
शिवपुरे गमनाय पदे श्रिया,
मितकलावऽहताविन तावकम् ॥ (द्रुतविलम्बित) १८

नेमे ! महामोहतमारवेऽगधीराऽजित ! त्वामतमोक्ष ! मान ।
नेमे महामो हतमारवेग !,
धीराजितत्वामत मोक्षमा न ॥ (इन्द्रवज्रा) १९

महोदयाऽऽसीन रवीरसार-महोऽदयासी नरवीर ! सार ! ।
क्षमारतेहाऽसमदानवाद्यऽ-
क्षमारतेऽहासमदानऽवाऽद्य ॥ (इन्द्रवज्रा) २०

हृद्याऽऽननाऽऽगोऽपमनोऽसमाय, शमाऽतनो राम यमोहमान ।
शमाऽऽतनोऽऽरामय मोह-मान-
हृद्यानना गोपम ! नोऽसमाऽय ॥ (उपजाति) २१

अष्टमीविधुसमानभाल ! यस्त्वामवन्दत वरप्रभालय ! ।
संश्रयन्ति सततं शुभालयस्तं
सरोरुहमिवाऽनिभालयः ॥ (रथोद्धता) २२

राज-राजतगिरि-स्फुरद्यशोरा-जरा-जनन-हीन मे जिन ! ।
राजराजदमरैः पिपासितेराऽजराजस-भरं त्वमञ्जसा ॥ २३
(रथोद्धता)

गतसङ्गर ! सङ्गर ! सङ्गरसो, धृतिमानऽवमानवमानवरैः ।
नृसभाऽवन-भावनभावविधे !
समतारत ! तारतताऽरतधीः ॥ (तोटकम्) २४

(द्रुतविलम्बित)

जिततमोऽक्ष ! तमोऽक्षत ! मोक्षभाग्,
प्रसृमराऽऽगम-राग-मराऽऽगसां ।
अश-मनोद ! मनो-दम नोदयं,
ध्रुवमऽदारमऽदाऽरमऽदारयत् ॥ २५

अशमना-शऽम ! नाशमना ! जिनोत्तम !
स-तामस-तामस-तातशम् ।
परमऽहार-महार-महार्यऽयाध्व-गतरो-गतरोग-तरो व्यधाः ॥२६

प्रबलभावमलिम्लुचसञ्चयं, जिन ! वधान वधाऽनवधान ! मे ।
निधिरमामपि मय्यवृषाञ्जगत्,
सुनवधा नवधा नवधाम ! मा ॥ २७

सपदि स त्वमपास्य मम प्रभो !, परमतार-मता-ऽरमतामिह ।
शमरसे जिन ! यस्य मनो मुनीश्वर !
मताऽरमताऽरमऽतामस ! ॥ २८

कृतीन ! पापोनमते ! नयस्व नः,
साध्वाऽऽनत ध्यानतपोनराऽवन ।
वर्याऽऽननेशानभिमानतर्जनः,
कृपामयः साततराववेभितः ॥ (उपजाति) २९

भविकजनहृदन्तः प्राज्य मुक्त्वार्युदन्त,
प्रहतमिति वदन्तस्तेत्रिलोकीभदन्त ।

गुणपटलमिदन्तदेहिनो व्यापदन्त,
क्षमभृशमनुदन्तस्त्वं तमः कुन्ददन्त ! ॥ (मालिनी) ३०

सुमह-समु-हरिद्रः सुन्दराऽऽस्योदरास्यो-
नितवनितवरेण्योदर्कधामार्कधामा ।
मम शममऽशसन्नऽत्राऽममोक्षाममोक्षा,
सिक-रसिक-रजोऽरिध्वंसने तासनेता ॥ (मालिनी) ३१

देवेन्द्रवन्दित ! शिवासुत ! यः सुविद्या-
नन्दं भवन्तमिति नौति सुधर्मघोषम् ।
हर्षादखण्डगुणकैरवखण्डबोध-
सोमप्रभं स लभते भविको भवान्तम् ॥ (वसन्ततिलका) ३२

पू.आ.श्री सोमप्रभसूरिविरचितम्

## ५. ॥ श्रीनेमिनाथ-स्तवनम् ॥

(नानाछन्दोनामसहितम्)

श्रीशैवेयं विनयविनतमर्त्त्याऽमर्त्त्या-
ऽधीशश्रेणीविरचितपदपूजं भक्त्या ।
छन्दोभेदैः प्रकटितनिजनामन्यासैः,
स्तोष्ये ताक्ष्य, **कुटिल**मदनसर्पाऽपास्त्यै ॥ १

भुजलीलया तुलित-शङ्खनिस्वनैः,
शमितारिराट् समरभानु **पथ्या** च ते ।
सुभटीव (च) दृग् त्वरितमुग्रसेनाऽग्रतो,
यदमोचयन् मृगवराहमुख्यान्विभो ! ॥ २

**सिंहोद्धता**हिगजभूतभयोज्झितस्य,
श्रीरैवतक्षितिभृतः क्षितिभालभागे ।

भव्याङ्गिमानसवनीनवसम्मदाम्र-
**वल्लीवसन्त** ! **तिलका**ऽनुकृतिं दधासि ॥ ३

धृतिमतिकीर्तिनिर्वृतिवधू प्रणया-
दसमसुखाय मङ्क्षु परिणेतुमनाः ।
त्यजसि यदि स्म रेणुमिव राजीमतीं,
तदिह विरागिता ननु विभोऽभिनवा ॥ (प्रमदा) ४

उद्दामपञ्चमतरङ्गितगीतिभिर्विभो !
चङ्गाङ्गहारकरणाद्भुतनर्त्तनैरपि ।
वीणा**मृदङ्ग**पटहादिरवैरनीह ! ते,
तूर्यत्रयं प्रमुदितास्त्रिदशा अदीदृशन् ॥ ५

**ऋषभ**स्त्वया जिन ! जितः स मतङ्गजोऽपि,
गमनैः शुभैर्गुरुगभीरिमतः समुद्रः ।
निजधैर्यतः सुरगिरिश्च यदीदृशं नो,
तदमी कथं क्रमतले कलयन्ति सेवाम् ? ॥ ६

नखकिरणजलोर्मी **मालिनी**श ! त्वदीये,
चरणसरसि शश्वद्राजहंसैर्निषेव्ये ।
सकमलतिमिचक्रे स्नानमातन्वतः श्राग्,
मम भवतु भवाध्वभ्रान्तिखेदापनोदः ॥ ७

विष्टपाद्भुतसमस्तस्तगुणोत्कर ! **सुन्दरं**,
तावकीनवदनं जिननाथ ! समानताम् ।
यातु केन विधिना सतताविधृतश्रिया,
पङ्कजेन शशिना च समं जलजन्मना ॥ ८

वीतव्रीडाः **कामक्रीडाः** खिड्गापीडाः स्त्रीप्रेष्याः,
प्रास्तत्राणप्राणिप्राण–क्षोदामोदिस्वान्ता ये ।
देवाः सेवाहेवाकित्वं तन्वानैस्तेऽप्यज्ञानै–
र्मन्यन्ते स्वामिन् ! निर्दोषं सर्वज्ञं त्वां हित्वा हा ! ॥ ९

स्त्रगसमसुमवसुविजित शशिकलाऽ
प्यपहृतमदमतिरिव तव यशसा ।
जिनवर ! रुचिजित**मणिगुणनिकर** !
त्यजति सपदि विकसनमतिविरसा ॥ १०

त्वम**चलधृति**रसि यदि जिन ! कथमिव
तदधिकतररुचिरसि शिववरपुरि ? ।
समिति सततकृततततरतिरसि यदि
किमिव तदुपशमरसमयमतिरसि ? ॥ ११

प्रभो ! मध्यस्थोऽपि क्षपसि बहुधा कर्मयोगा–
नभव्यानां सिद्धिं जनयसि न मैत्रीं श्रितोऽपि ।
तथा कन्यात्यागेऽप्यनुभवसि यत्प्रोच्चभावं
बुधत्वं नव्यं तत्तव शिव ! **जयानन्द**दायिन् ! ॥ १२

रमास्पदे जितामरापगातरङ्गचङ्गभाः–
**प्रपञ्चचामरा**वलीमरालमण्डलीश्रिते ।
विलोचनोल्लसद्दले रदांशुकेशरेऽलितां
प्रभो ! प्रयातु ते मुखाम्बुजे मदीक्षणद्वयम् ॥ १३

ललितपदा सुलक्षणगुणा सुवर्णकान्ति–
र्मृदुमधुरोक्तियुक्तिसुभगा सुवृत्तरम्या ।

विलसदलङ्क्रियारुचिरविग्रहा न केषां,
हरति मनांसि नाथ ! तव **वाणिनी**व वाणी ? ॥ १४

सद्दानाम्भोमिलदलिकुलभ्राजमानेभमाला
**मन्दाक्रान्ता**र्णवनिवसनस्यन्दनश्रेणिरम्या ।
नाथ ! न्याय्या सरयहययुग्वीर्यवत्पत्तियुक्ता,
यद्राज्यश्रीर्भवति भविनां स त्वदंह्रिप्रसादः ॥ १५

युवतिविरतोऽप्युच्चैर्मोदप्रदो **हरिणी**दृशां,
निखिलविषयग्रामच्छेदोत्सुकोऽपि जगत्सुहृत् ।
क्षितिभृति सदाचारोऽप्यत्र स्थिरत्वमितः प्रभो !,
वद मृदुतया युक्तोऽप्याप्तः क्षमाधरतां कथम् ? ॥ १६

सदा दोषोच्छेदिन् ! हिम **शिखरिणी**ह त्वमुदितः,
समं सच्चक्रैर्यन्मदयसितमां कौशिककुलम् ।
समं पद्मोल्लासैः कुवलयविबोधं च कुरुषे,
चमत्कारं स्फारं जनयसि न केषां मनसि तत् ? ॥ १७

नयन्नसमविस्मयं स्वचरितेन **पृथ्वी**जनं,
क्षमोद्धरणधीर ! हे न नरकभेदनत्वं जिन ! ।
प्रमोदलहरीभृते मम मनोर्णवे ब्रह्मणा-
ऽन्वितो निरुपमश्रिया वसतमामनन्तेन च ॥ १८

शुचिशङ्खसुचक्रचापभागपि गदान्वितो नो,
पुरुषोत्तमतां श्रयन्नपि त्वमजनार्दनश्च ।
छलवर्ज्यपि यः पुराऽश्नुषे त्रिभुवनं त्रिपद्या,
त्वयि तत्र **ममातिशायिनी** भवतु भक्तिरीश ! ॥ १९

शारदचन्द्रमःसमयशस्ततिधवलितस-
द्यादव**वंश ! पत्रपतितं** चपलजलरुहः ।
प्रोज्झ्य चलं पयोलवमिव क्षितिपपदसुखं
नित्यमशिश्रियः शिवसुखं त्वमिन ! शमधन ! ॥ २०

अवितथवादिनस्तव न कोकिलकण्ठरुचा-
मसमतमसां दूरीभूता प्राप्यते पद्मनेत्र ! ।
निःपुण्यैर्यैर्दृगिव विशदा वाग्हारिणी तेऽघधी-
**भाराक्रान्ता** ध्रुवमपथगाः पतन्ति भवावटे ॥ २१

शुचितरचम**रैर्निशा**धीश्वराभीशुभङ्गप्रदै-
स्त्रिदिवयुवतिभिर्लसत्प्रोतिभिर्वीजितः स्वःपतिः ।
प्रणतसुरशतः प्रस्फुरन्नृत्यसङ्गीतकः,
समनुभवति यत्सुखौघं प्रभो ! तत्तवाऽऽज्ञाफलम् ॥ २२

रामाः कामास्त्र कुसुमितलता चित्रलेखा मरन्दो-
न्माद्यद्भृङ्गा लसदसमसुधा **चन्द्रलेखा**त्विषश्च ।
चित्तं हर्त्तुं नलिनवनभुवोऽप्युत्केसरश्रीभरा,
नासन्नीशा जिन ! तव शिवकृच्छमामृतनिश्चलम् ॥ २३

तावन्मोहगजेन गर्जितमथो मिथ्यात्वदुष्प्रोथिना,
स्वैरं घुर्घुरितं मनोभवमहाशण्डेन च त्राट्कृतम् ।
भव्यप्राणिमनोवने मदमृगैर्भ्रान्तं च यावत्त्वया,
स्वामिन् ! नामिततेजसा प्रकटितं **शार्दूलविक्रीडितम्** ॥ २४

परिस्फूर्ज्जत्तूर्यध्वनिभिरभितच्छायानुमेयाचिर-
प्रभारोचिभरैः श्रितघनरसै**र्मेघविस्फूर्जितानि** ।

वितन्वानैः स्वामिन्नमरवरभरैर्देशनाभूमिशोभा-
शैलस्त्वं सेवितोऽस्तान्यमत ! सुवदनाम्भोजन्मरुचिभिः ॥२५

त्वदुदितसिद्धिशर्मपरमामृतपानमत्तजनावली
हृदयनिबद्धवसन्तविकाशिरसालसद्वनमञ्जरी ।
षट्पदमालिकेव कलयत्यमद्रकलिकां कदर्क्कतरुजां,
किं जिनराज! कदाचन वैषयिकाशुचिसौख्यभवां **मदिराम्**॥ २६

आनन्दवशंवददैवतताडितदुन्दुभिमद्र्दलशङ्खरवं
नवलवणिमभृद्युवतिललिताभिनयजनितजनचित्रम् ।
ध्वनिमधुरिमधृतविविधसविधभाग्मेकचकिसारस**हंसलयं**
समवसृतिक्षितितलमिन ! सेवे गवति हि तव यदनुपमरुचा॥ २७

यः श्रीमन्नेमिनाथं मदनमदभिदं छन्दसां व्यक्तभक्त्यु-
ल्लासो भेदैर्विचित्रैर्नमदमरमिति स्तौति शस्तप्रसूत्यै ।
प्रेमस्थेमाशुशर्मस्मितसुमवरण **स्त्रग्धरा** साक्षरश्री-
स्तं प्रक्षीणाघसङ्गं वरितुमभिसरत्यात्मविद्यालयस्थम् ॥ २८

पू.आ.श्री जयसिंहसूरिविरचितम्

समस्यागर्भितम्

## ६. ॥ श्रीनेमिजिनस्तवनम् ॥

(उपजाति)

श्रीरैवताद्रौ जिनपं स्तुवेऽहं, निरीक्ष्य यद्रूपमहोऽमरीभिः ।
हर्षप्रकर्षादिति वाक्यमूचे, ममं मममं मममं मममं ॥ १

केलीषु रम्भावनमध्यगेन त्वयैव द्रष्टानि तदाऽऽलवाले ।
जलान्तरस्थे(थ)प्रतिबिम्बितानि चन्द्रस्य मध्ये कदलीफलानि॥ २

श्रीउग्रसेनक्षितिपालपुत्री, राजीमती तद्(त्वद्) विरहभ्रमेण ।
जालोपविष्टाऽनसि पूर्णमास्यां, सहस्रचन्द्रं गगनं ददर्श ॥ ३

न चन्दनं चन्दनचित्तमेनन्निदक्षिणो दक्षिणवात एषः ।
राजीमती जल्पति ते वियोगादङ्गारका शीतकरात् पतन्ति ॥४

चीनांशुकाच्छादितमध्यदेशमपास्य पल्यङ्कमतीवचारु ।
भवद्वियोगाद् विदधे ययैव, प्रवालशय्याशरणं शरीरम् ॥ ५

त्वदीय भामण्डलभानुबिम्बं, भ्रमेण हृष्टा हृदि चिन्तयन्ती ।
प्रियः समेष्यत्यधुनैव तस्माच्चन्द्रोदये नृत्यति चक्रवाकी ॥ ६

विलोक्य बाला वदनेन्दुबिम्बं, कण्ठे च मुक्ताफलहारतारा ।
पुनर्निशाऽसौ भ्रमितेव शङ्के, सूर्योदये रोदिति चक्रवाकी ॥ ७

वीक्ष्यसे किमयि ! नीलशरीर !, पूजितस्त्वममराधिपवृन्दैः ।
दिव्यगन्धसहितैः कनकाभैश्चम्पकैः कुसुमितः सहकारः ॥ ८

(स्वागता)

पवित्रं त्वदास्यं गिरौ रैवतेऽस्मिन्,
मया भ्राम्यता भूतले सर्वतोऽद्य ।
कलौ प्राणिनां सर्वदा कल्मषौघे,
प्रफुल्ले करीरे सरोजं ह्रि(हि) दृष्टम् ॥ (भुजङ्गप्रयात) ९

कृष्णर्षिगच्छे जयसिंहसूरिकृतं समस्यास्तवनं नवीनम् ।
श्रीनेमिनाथस्य पठत्यजस्रं, सौभाग्यलक्ष्मीं लभते स भव्यः॥ १०

(उपजाति)

पू.आ.श्री जिनपतिसूरिविरचितम्

उज्जयन्तालङ्कार-

## ७. ॥ श्रीनेमिजिनस्तोत्रम् ॥

(वसन्ततिलका)

व्याख्यास्तु यस्य रदनद्युतयोऽसिताङ्ग-
भाशारिता विसृमरा हरिदङ्गनानाम् ।
वक्षःसुनीलमणिखण्डविमिश्रमुक्ता-
दामश्रियं विदधिरेऽवतु वः स नेमिः ॥ १

यस्याङ्गनिर्यदतिसान्द्रविसारिनील-
कान्तिप्रतानपिहिताः ककुभो विभाव्य ।
जन्मोत्सवस्य दिवसे नववारिवाह-
सन्दोहशङ्कितधियो ननृतुर्मयूराः ॥ २

श्रीमच्चतुर्वदनभाषितवाङ्मयाब्धिः,
पादोपगूहनपवित्रितराजहंसः ।
पद्मोद्भवस्त्रिजगतीभवकृत्स्वयम्भू-
र्यो दिद्युते नियमितस्फुरदक्षमालः ॥ ३

कृत्स्नागसन्धिसुभगां प्रणिधिप्रधानां,
सद्विग्रहां मृदुकरां वरदन्तियानाम् ।
उत्सृज्य राज्यकमलां गुणराजमानां,
राजीमतीं च दयितां जगृहे व्रतं यः ॥ ४

भामानिलीनहृदयः सहितो बलेन,
सद्धर्मचक्रमथितप्रतिपन्थिसार्थः ।

गोपालपूगकृतसंस्तवनोर्च्यते यो,
गोमण्डलं जडविपत्तित उद्दधार ॥ ५

दीक्षामहस्यतनुसान्द्रदरिद्रताद्रु-
विद्रावणं वितरता द्रवितं वितन्द्रम् ।
येन द्रुतं तनुभृतः सुखिनोऽक्रियन्त,
सातायर्वजगतौ (साताय सर्वजगतां ?) महतां हि भूमिः ॥ ६

स्फूर्जत्कलानिलयसङ्कलितोत्तमाङ्गो,
विश्वम्भराभृदतिशायिकृतानुरागः ।
रोचिष्णुगूरुचितशक्तिधरः स्मरारि-
र्यो भारतं परमसिद्धिलवं चकार ॥ ७

आश्चर्यमेकमपि यस्य वचो विचित्रां,
लोकस्य संशयततिं युगपन्निरास्थत् ।
भव्यात्मनां भुवि सदा फलितस्य पुण्य-
कल्पद्रुमस्य क इवाविषयोप्यवार्यः ॥ ८

यत्कौशिकस्य परमप्रमदं तनोति,
शश्वन्महोभिरधिकं विधुमादधाति ।
विस्फारयत्यनुदितं कुमुदं च यस्य,
तत्केवलं कथमिवार्कसमं समस्तु ॥ ९

अद्यापि यत्प्रतिकृती रुचितां पिपर्त्ति,
पुंसां स्थिता गुरुणि रैवतकाद्रिशृङ्गे ।
स श्रीसमुद्रविजयक्षितिपाङ्गजः श्री-
नेमिः श्रियं जिनपतिस्तनुतान्तरां वः ॥ १०

पू.आ.श्री चन्द्रसूरिविरचितः

# ८. ॥ महार्थगम्भीरश्रीनेमिनाथस्तवः ॥

(अनुष्टुप्)

श्रीशैवेय ! जयामेय !, गुणरत्नमहोदधे ! ।
जयापारकृपाधार !, स्फारसंसारतारक ! ॥ १

श्रीमन्नेमिजिन ! स्वामिन् !, सहजेनात्मतेजसा ।
तमोऽमग्नं भवोद्विग्नं, मामुद्धर कृपापर ! ॥ २

रागादिशत्रवो देव !, निर्जिता ये त्वया पुरा ।
त एव तव वैरेण, बाधन्ते मां त्वदाश्रयम् ॥ ३

सर्वभावैकसामान्यमौदासीन्यमिहाश्रयन् ।
त्वं चेदुपेक्षसे तत् ते, कुतः सुस्वामिताऽमिता ॥ ४

उदिते न मुदे यावत्, त्वन्मयं चिन्मयं महः ।
स्वामिन् ! मोहतमस् तावच्चित्तान्तर्जायतेऽङ्गिनाम् ॥ ५

संसारसागरस्यान्तर्मोहावर्त्तगतः प्रभो ! ।
कदा मात्रभवद्ध्यानयानपात्रमहं श्रये ॥ ६

अहो मदोद्धतं चित्तं, सदा कृतकदाग्रहम् ।
तथा प्रसीद विश्वेश !, यथा सीदति न क्वचित् ॥ ७

तृष्णया तरलं स्वामिन् !, विह्वलं स्मरतापतः ।
शान्तिमेति यदि स्वान्तं, त्वद्ध्यानाऽमृतमज्जनात् ॥ ८

जातु किं जन्तवो यान्ति, क्रोधक्रूराऽध्वना विभो ! ।
शमैकसारं त्वन्मार्गं, मार्गयन्ते यदि क्षणम् ॥ ९

मधुना स्पद्‌र्धमानेनाऽध्वना ध्यानं धुनाति ते ।
अनाहतेन नादेन, जिन ! कर्माणि योगिनाम् ॥ १०

पार्थिव्यादिस्फुरत्पञ्चपिण्डस्थध्यानधारणाः ।
अभ्यस्यन्ति तवाधीश !, परज्ञानाय योगिनः ॥ ११

यथोपदेशं चक्रान्तर्हद्‌बीजादियोजनात् ।
ध्यायन्ति त्वां महात्मानः, पदस्थध्यानसिद्धये ॥ १२

राग-द्वेषविनिर्मुक्तं, योगयुक्तं निराश्रयम् ।
निर्व्यातित स्फुरद्‌द्योतिकर्माणं करुणापरम् ॥ १३

आत्मानं केवलालोकलोकाऽलोकाऽवलोकितम् ।
ध्यायेद् यस्त्वन्मयत्वेन, स स्याद् रूपस्थविन्मुनिः ॥ (यु.)१४

नानाश्रुतविचारं स्यादैक्यश्रुतिविचारकम् ।
सूक्ष्मक्रियाऽभिधं चैव, समुच्छिन्नक्रियं तथा ॥ १५

इति मत्वात्मसंवेदात्, शुक्लध्यानचतुर्विधम् ।
योगिनो गतरूपं त्वामन्तः पश्यन्ति चिन्मयम् ॥ (यु.) १६

नानाध्यानैः पुरा देव !, येन ध्यातोऽसि चेतसा ।
क्रमेणात्मानमविश्य, तन्मारयसि चारु तत् ॥ १७

निराकारं निराधारं, निराहारं निरञ्जनम् ।
विदन्ति परमार्थेन, देव ! त्वां तत्त्ववेदिनः ॥ १८

अजिह्मः परमब्रह्ममयस्तेजश्चयस् तव ।
किं सर्वगोऽपि मे मोहतमो हरति न प्रभो ! ॥ १९

भवग्रीष्मभवस्तापव्यापः स्याद् देव ! देहिनाम् ।
तदा यदा चिदानन्दचन्द्रस् त्वमसि दूरगः ॥ २०

शून्यता स्वपदे देव ! जागरे ऽनल्पकल्पना ।
एतद् द्वयातिगं किञ्चिद्, वदन्ति त्वत्पदं बुधाः ॥ २१

त्वयि ध्येये व्रजेद् ध्याता, ध्यानं च विलयं विभो ! ।
अतो बहिर्मुखा लोका, विमुखास्तव चिन्तने ॥ २२

ये तु तत्वविदो देव ! कल्पनातीतचेतसः ।
ध्येयादित्रिकभेदांस्ते, न विन्दन्ते मनागपि ॥ २३

इदं ध्येयमिदं ध्यानमहं ध्यातेति धीर्भवेत् ।
तेषां येषामुदासीनपदासीनं, मनो न हि ॥ २४

यस्त्यक्तकर्मनिःसङ्गो, नित्यतृप्तो निरञ्जनः ।
सदानन्दमयः स त्वं, त्वं स एवेति मन्मतिः ॥ २५

विपक्षे च स्वपक्षे च, मूर्खे चैव विचक्षणे ।
दुःखे सुखे समस्वान्ता, नाथ ! त्वद्वेदिनो जनाः ॥ २६

किं तेन तपसा तेन, श्रुतेन विनयेन वा ।
जपेन तेन किं येन, नाथ ! त्वं नोपलक्ष्यसे ॥ २७

पापकर्मकृतोन्माथ, नाथ ! तत् कुरु येन मे ।
स्वल्पा भवन्ति सङ्कल्पा, विषयग्रहगोचराः ॥ २८

परानन्दपदे मेऽस्तु, निमग्नस्य जगत्प्रभो ! ।
वेद्य-वेदकभेदैकशून्यता त्वत्प्रसादतः ॥ २९

नार्थयेऽन्यद्विभो ! किञ्चिद्, याचे त्वामेतदेव हि ।
समुल्लसतु मच्चित्ते, त्वत्प्रसादात् परं महः ॥ ३०

श्रोत्रपेयामृतं स्तोत्रमेतद् यः सुकृती पठेत् ।
त्रिकालं यादवाऽधीश !, स भवेत् त्वत्स्वरूपवित् ॥ ३१

करोत्करो नभोरत्नचन्द्रसूरीह दीप्यते ।
यावत् तावत् क्षितौ देव !, संस्तवस्तव नन्दतात् ॥ ३२

इति महार्थगम्भीरस्तवेन श्रीनेमिं स्तुत्वा ।
पञ्चाङ्गस्पृष्टभूतलश्चक्रवर्ती पुनः प्रणति स्म ॥ (आर्या) ३३

(अञ्चलगच्छीय) पू.आ.श्री ऋषिवर्धनसूरिविरचितम्

## ९. ॥ श्रीरैवताचलनेमिनाथस्तवनम् ॥

(यमकमयम्) (वंशस्थ)

समुल्लसद्भक्तिसुराः सुरासुराधिराजपूज्यं जगदङ्गदङ्गदम् ।
हरन्तमीहारहितं हितं हितं नेमिं स्तुवे रैवत केतके तके ॥ १

बिभर्त्ति यस्य स्तवने वने वने रीसेर संयद्रसना सना सना ।
सिद्धेर्भवेन्नन्ववरो वरो वरो नेमिं स्तुवे रैवत केतके तके ॥ २

यशः पटस्य प्रभवे भवे भवे भवत्प्रभावप्रगुणा गुणा गुणाः ।
यस्याति हर्षं सुजनं जनं जनं नेमिं स्तुवे रैवत केतके तके ॥३

जिगाय खेलंस्तरसा रसा रसा तिरेकजाग्रन्मदनं दनं दनम् ।
यो बाहुदण्डं विनयं नयं नयं नेमिं स्तुवे रैवत केतके तके ॥४

येनाङ्गराजीभयतो यतो यतो ऽवगत्य तत्त्वं दुरितारितारिता ।
स कस्य नेष्टः सदयो दयो दयो
नेमिं स्तुवे रैवत केतके तके ॥ ५

सुरा अपि प्रोन्नतया तया तया रूपस्य यस्या मुमुहुर्मुहुर्मुहुः ।
यस्योग्रजनाप्यजनी जनी जनी नेमिं स्तुवे रैवत केतके तके ॥६

भवे प्रनाभानवमे वमे वमे जहासि तत् किं वदमा दमा दमा ।
यस्येति भोज्या सहसा हसा हसा
नेमिं स्तुवे रैवत केतके तके ॥ ७

वनेऽत्र दीक्षा जगृहे गृहे गृहे
स्थित्वा (च) दत्त्वा कनकं न कं न कम् ? ।
संतोष्य येना ममता मता मता नेमिं स्तुवे रैवत केतके तके ॥८

धर्मस्य तत्त्वे भवतोऽवतो वतो द्यमो विधेयो जगदे गदे गदे ।
येनाङ्गिनां संयमिनामिनामिना नेमिं स्तुवे रैवत केतके तके ॥९

शरीरशोभातिघनाघनाघना प्रतापदीप्तिस्तरुणारुणारुणा ।
वाणी च यस्योल्लसिता सिता सिता
नेमिं स्तुवे रैवत केतके तके ॥ १०

तर्कव्याकरणागमादिचतुरस्फूर्जत्सुधासारवाक्
पूज्यश्रीजयकीर्त्तिसूरिसुगुरुध्यानैकतानात्मना ।
सूरिश्रीऋषिवर्धनेन रचिता त्रैलोक्यचिन्तामणेः
श्रीनेमेर्यमकोज्ज्वला स्तुतिरियं देयात् सतां मङ्गलम् ॥ ११

(शार्दूलविक्रीडितम्)

पू.आ. श्री जिनप्रभसूरिविचतम्

## १०. ॥ श्रीनेमिनाथस्तवनम् ॥

(गुप्तक्रियापदम्)

श्रीहरिकुलहीराकरवज्रमणिर्वज्रपाणिना प्रणतः ।
त्वमवद्यमुक्त ! नेमे ! प्रणेमुषां शेमुषीमशुभाम् ॥ (अवद्य) १

मयि प्रसादं प्रवणं कृपानिधे !
विधेहि शैवेय ! निजं मनस्तथा- ।
यथा जगन्नाथ ! मधुव्रतव्रतं
भवे भवेत्ताव(तार)कपादपद्मयोः ॥ (भवेत्) २

नयेन नेमे ! यदुवंशमौक्तिक !
श्रियां निवासः तव पादपङ्कजम् ।
दुःखोर्मिसङ्कट्टविघट्टितात्मना
तेनाति गम्भीरतमे भवाम्बुधौ ॥(आति) (वंशस्थवृत्तद्वयम्) ३

दुर्नयार्णवमहातरीनिभाः,
स्यात्पदोपहितवस्तुविस्तराः ।
पातकानि भवदीरिता गिरो-
ऽजन्तु जात शिवदानलालसाः ॥ अजन्तु । (रथोद्धता) ४

प्रेङ्खन्नखश्रेणिमयूखलेखा-
निर्वासिताऽशावलयान्धकारम् ।
अवार्यसौन्दर्यविलास ! गेऽहम्
तवाङ्घ्रियुग्मं शरणं प्रपद्ये ॥ (गे) उपजातिः ५

यस्त्वया ऋजुपथः सतां मतो-
देवखण्डितकुतीर्थिकवर्गः ।

तं प्रपद्य निरवद्य मुद्यता-
नन्द(नेद)यन्ति ननु मुक्तिपुरीं द्राक् ॥ (ऊदे) रथोद्धता ६

वरिवस्या विधौ यस्तेऽसद्विवेकविनाकृतः ।
तस्याभिमुखमीक्षन्ते न जातु सुखसम्पदः ॥ (असत्) ७

कर्मकक्षावलीपावकं तावकं,
दुर्नयाहङ्कृतित्रासनं शासनम् ।
ये प्रपन्ना गुणस्नेहिनो देहिन-
स्तेऽसुराराध्य-दुःखानि खानि श्रियाम् ॥(असुः) स्रग्विणी ८

विभवराज्यकलासुरराज्यता,
वरमणीरमणीभिरलं मम ।
हृदि पदाम्बुरुहस्मरणं च ते,
गिरि च तथ्यगुणस्तवनं तव ॥ (चते) (द्रुतविलम्बितम्) ९

जगज्जनश्रवणपुटामृतच्छटां,
तमोपहां सुललितरागपेशलाम् ।
उदीरयन् गिरमिलदेशना वना-
वरा गतामय ! सुखसम्पदं सताम् ॥ (अराः) १०

भव्यान् भवभ्रमणभीरुकचित्तवृत्तीन्
सद्देशनाभिरभितस्त्वमुरुप्रभावः ।
दोषासमागमनिमीलितमब्जखण्ड-
माश्वासयेन्न-किमु रश्मिभिरंशुमाली ॥ (आवः) ११

भूत्याभिभूत पुरुहूतपुराभिरामतां
कुर्वन्ति सन्ततमहोत्सवभाजमुर्वराम् ।

स्वच्छन्दनन्दथुमयानि महाद्भुतानि ! ते
कल्याणकानि भुवनेश ! विभाव्य चेतसा ॥ (अयानि) १२

भास्त्वया भ्रमरं विभ्रमवर्णो–हे मुनीन्द्र ! वपुषि प्रचरिष्णुः ।
पापशात्रवनिबर्हणकृष्ण–
ध्यान–सन्ततिरिवाश्रितमूर्तिः ॥ (ऊहे) १३

दुर्बोधं मे सपदि पदकीभूतवास्तोःपते सद्–
भृङ्गं श्रेणी कुवलय–वन–श्यामलच्छायकाय ।
आकौमाराद् भुवनजयिभिर्यस्य ते ब्रह्मवर्म–
स्वैः कादम्बैर्न खलु मदनः स्प्रष्टुमप्यक्षमिष्ट ॥ (श्य) १४

भाद्राम्भोदनिनादयादवकुलश्रीकण्ठपीठीलुठन्–
मुक्ताहारमहारथं रतिपतिं निर्जित्य जैनाजिरे ।
कीर्तिं कैरवकोमलामधिगतं त्वामेव देव ! प्रभुम् ।
श्रीमन्नेमिजिनेन्द्रचन्द्रशरणं भीरुर्भवारातितः ॥ (एमि) १५

सेवाहेवाकिनः स्युस्तव पदयुगले येऽत्र भक्तिप्रयुक्ता–
स्तेषां देवाः सदा पिप्रति हतविपदः सम्पदः सुप्रसन्नाः ।
चिन्तारत्नं प्रयत्नात् करतलकलितं कुर्वतां सर्वकालं
कालन्नेतर्नराणामटति सुघटतां नो मनोराज्यसिद्धिः ॥ १६
(पिप्रति) (स्रग्धरा)

भवतारि जयोद्धुरैर्यशःप्रसरैः शुक्लयता जगत्त्रयम् ।
जिन ! सिद्धि–रिति ! प्रसिद्धिभाक्
सुखसाम्राज्यमयी महापुरी ॥ (आरि) १७

अवगच्छतरां स्वसेवकं मां भगवन् !
यां च शिवस्य वर्त्तिनीं त्वम् ।
करुणार्द्रमनाः कुरु प्रसादं
मयि तस्याः सपदि प्रकाशनेन ॥ (अवक्) १८

मरकतकमनीयकान्तिकाय !
त्वमभिनतेन्द्र ! कीरीटघट्टितांह्रे ! ।
चिरमिन मम चञ्चरीकचर्यां
हृदयकुशेशय कोशमन्वजस्रम् ॥ (अय) १९

निखिलजगतां गोप्ता गुप्तक्रियस्तवसूत्रणा-
दिति कृतनुतिः सानन्दं श्रीजिनप्रभसूरिभिः ।
भवतु भवतां भेत्तुं भूयो भवभ्रमसंभवं
भयमभयदो भीमः श्रीमच्छिवातनयः प्रभुः ॥ २०

पू.आ.श्री रत्नसिंहसूरिविरचितम्

## ११. ॥ श्रीनेमिनाथस्तोत्रम् ॥

(अनुष्टुप्)

मूर्त्तयस्ते क्व नेक्ष्यन्ते श्रीनेमे ! त्वत्प्रभावतः ।
रूपलावण्यसौभाग्यै-र्हृल्लेखैकधुरन्धराः ॥ १

मुक्तिसौख्यमनाख्येयं त्रैलोक्येऽपि शरीरिभिः ।
गम्यं चानुभवस्यैव यत्सिद्धैरेव वेद्यते ॥ २

उक्तं श्रद्धीयते नान्यैः स्याद्वादात्किन्तु मन्यते ।
चित्रं चित्रं कथं नाथ ! तदद्य वेद्यते मया ॥ ३

त्वयि दृष्टे मनो हृष्टं नेमे ! मुक्त्वाऽन्यसङ्कथाम् ।
प्रेत्येहापि तथा याचे यथा नाथ ! ममाधुना ॥ ४

नेमे ! मम मनो जज्ञे त्वय्यानन्दसुधामयम् ।
दृष्ट्वा कर्पूरपूरस्य मण्डनं पापखण्डनम् ॥ ५

स्तोतुमास्याम्बुजं नाथ ! यावदुत्सहते मम ।
सौख्याधिक्याय मन्येऽहं तावद्वाचो मनः श्रिताः ॥ ६

देवाकर्ण्णय विज्ञप्तिं किमन्यैर्भूरिभाषितैः ।
सुधां हालाहलं मन्ये नेमे ! त्वद्दर्शनात्पुरः ॥ ७

नरं न (न रत्न ?) सिंहवन्मन्ये न तं सूरिं ब्रवीम्यहम् ।
यः प्रीतः प्रातरुत्थाय श्री नेमे ! त्वां न पश्यति ॥ ८

पू.आ.श्री विजयसेनसूरिविरचिता

उज्जयन्ताचलमण्डन-

## १२. ॥ श्रीनेमिजिनद्वात्रिंशिका ॥

(शार्दूलविक्रीडित)

श्रीनेमिर्मुदमुज्जयन्तजगतीभृन्मौलिनीलोपलः,
श्रेयःकन्दनवाम्बुदः शमिचमूहृत्पद्मपुष्पन्धयः ।
देयाद्दीधितिपत्रलः प्रणमतां सांसारिकप्रान्तर-
भ्रान्तिश्रान्तिनिशुम्भनः शिवपुरीनिस्सीमसीमद्रुमः ॥ १

वाणि ! ब्रह्ममहःसमुद्भवतया ब्राह्मीति यत् कीर्त्यसे,
तेन त्वं गुरुपक्षपातरभसान्मातर्विहायापरम् ।
आजन्मप्रतिपालिताऽमलतमब्रह्मव्रतस्य प्रभोः,
श्रीमन्नेमिजिनेशितुः स्तुतिपथे पान्थश्रियं संश्रयाः ॥ २

कस्तूरीतिलकत्यलीकफलके नीलोत्पलोत्तंसति,
श्रोत्रोत्सङ्गयुगे कुरङ्गति कपोलेन्दुद्वये यद्द्युतिः ।

श्रेयः कम्र-विनम्र-रम्र-सुमनः सीमन्तिनीसंहतेः,
श्रीशैवेयजिनः स नः प्रथयतां पुण्यास्पदं सम्पदाम् ॥ ३

प्रीतिं पल्लवयन्तु वो यदुपतेर्देवस्य देहद्युतो,
भृङ्गाभाः शशिकुन्दसुन्दररदज्योतिश्छटालङ्कृताः ।
याः सम्मोहपराजयैकपिशुनप्रोत्कीर्णवर्णस्फुरद्-
दूर्वापट्टसनाभयः शुशुभिरे धर्मोपदेशक्षणे ॥ ४

श्रेयः पुष्यतु शाश्वतं यदुकुलक्षीरार्णवेन्दुर्जिनो,
यत्पादाब्जपवित्रमौलिरसमश्रीरुज्जयन्तोप्ययम् ।
धत्ते मूर्ध्नि निजप्रभुप्रसृमरोद्दामप्रभामण्डले,
विश्वक्षोणिभृदाधिपत्यपदवीं नीलातपत्रोज्ज्वलाम् ॥ ५

नेत्रं वक्त्रविलोकनाय रसना स्तोत्राय चे[त]श्चिरं,
सायुज्यायऽतव प्रणामविधये मूद्र्धा मुहुर्धावति ।
एभिः स्वावयवैः परस्परमिति स्पर्द्धिष्णुभिर्वर्द्धिता,
क्लान्तिर्मे वपुषस्तथाप्ययमभूदात्मा कृतार्थः प्रभो ! ॥ ६

नम्रे मूद्र्धनि वीक्षितुं तव मुखं नेत्रोत्पले ताम्यत-
स्तद्द्रुष्टुं स्फुटमुन्नतेः पुनरिदं भालं च नाऽलं नतौ ।
इत्यन्योन्यविरुद्धकार्यविवदच्चक्षुर्ललाटस्य मे
वन्दारोः सदयं प्रसीद भगवन्नध्यक्षभूयं भज ॥ ७

ध्वस्ता दुर्भगता नकारविलसस्यैकारमात्राधिकं,
मन्त्रेषु स्फुरितं मकार सुकृतं वर्गेषु तेऽनुत्तरम् ।
स्फूर्जन् कुण्डलिनी कला किल तवेकारः प्रभुः कीर्त्यसे,
यैर्युष्माभिरयं जिनो यदुकुलालङ्काररत्नाङ्कुरः ॥ ८

धूमश्यामलधूपभाजन इव स्वस्यां तनौ यश्चिरा-
दाजन्माऽगुरुलीलयैव विषयासक्तप्रियं भावुकम् ।
दग्ध्वा मन्मथमादधे किमपि तच्चारित्रवस्त्रे यशः-
सौरभ्यं भुवनेषु यत्परिमलो नाद्यापि विश्राम्यति ॥ ९

यस्मान्नाशयति प्रिया तव कृपा मामेकपत्नीमपि,
स्वान्तात् तत्र निमित्तमस्तु विदितं स्त्रीणां किलेर्ष्यायितम् ।
सामान्यां यदि मां पशुष्वपि परं प्राणेश्वरीं मन्यसे,
तत् कोऽस्तीति [स] राजिमत्यभिहितः
स्वामी शिवायाऽस्तु वः ॥ १०

सौभाग्यैकनिकेतनं प्रिय ! कथं कान्ता तवेयं जगत्-
प्राणित्राणकृतो दयाऽपि न दया स्वामिन् मयि स्निह्यति ।
यद् वा मानवती सहेत महिलामन्यां न मान्यां मना-
गेवं भोजकुलाम्बुजैकरमया प्रोक्तः प्रभुः पातु वः ॥ ११

स्वामिन् ! विज्ञपयामि किञ्चन
वदत् यत् क्वेति मां [?] त्वं कुतो,
दीक्षार्थी ननु मुक्तये तव भवेत् किं सा प्रिया चेदियम् ।
मद्दोषं कथयास्थिरां स्थिरतरां तां तद् दिदृक्षे ममा-
ध्वानं तद् भज दीक्षयन्निति जिनो राजीमतीं पातु वः ॥ १२

कारुण्यं कुरुषे पशुष्वपि जने नास्मिन्ननन्यप्रिये,
साम्राज्यश्रियमुज्झसीश ! विरतिं यत्प्रेयसीं मन्यसे ।
तत्को नाम विदाङ्करोतु गहनं चित्रं चरित्रं तवे-
त्येवं नेमिजिनोऽस्तु वोऽन्वयजनोपालम्भभाग् भूतये ॥ १३

देव ! त्वद्वदनेक्षणप्रसृमरैरानन्दबाष्पोर्मिभिः,
सिक्तं नेत्रमिदं सदास्तु सुधियां रोमाङ्कुरैरङ्कितम् ।
क्षेत्रज्ञोऽपि यदत्र पुण्यनिकरैः प्रौढप्ररूढाङ्कुरो,
जन्मारामविराममारचयितुं चित्रीयते तत् पुनः ॥ १४

मौलौ पाणिसरोजयुग्ममनिशं कोशीभवत्युच्चकै-
र्येषामीश ! भृशं भवन्ति कृतिनः कोशास्पदं ते श्रियः ।
त्वत्पादप्रणिपातनिर्मितसकृत्पञ्चाङ्गसङ्गाः पुनः,
सप्ताङ्गं विलसन्ति यद्वसुमतीं नित्यं तवेत्यद्भुतम् ॥ १५

पाताले वितनोति पन्नगवधूवर्गस्य पर्वानिशं,
क्षीराम्भोनिधिमज्जनं जनयति क्षोणीजनेष्वन्वहम् ।
अक्षाराम्बुधिजा सुधेव दिवि यत् तद् भूर्भुवःस्वस्त्रयी-
श्रेयः सन्ततिमाततान किमिव ब्रूमस्त्वदीयं यशः ॥ १६

यैरत्युग्रनृपोग्रसेनविधृतैर्मुक्तैस्त्वमेव स्मृतो,
गाढग्रन्थिनिरोधवञ्चनविधेरुन्मोचिता ये त्वया ।
ये दृष्टाः करुणारसाऽर्णवसुधावृष्ट्या च दृष्ट्या त्वया,
धनेभ्यः स्पृहयामि मान[?] भगवंस्तेभ्यः पशुभ्योऽप्यहम् ॥१७

देव ! श्रीयदुवंशपल्वलजलैकाऽम्भोजभोजात्मजा-
सङ्कल्पोपनतप्रियत्रिजगतीकस्तूरिकास्थासक ! ।
आदिक्चक्रविसृत्वरे तव यशश्चन्द्रे सदा पर्वणि,
ध्वान्तध्वंसिनि हारिणि विजयते मूर्त्तिस्तवैव प्रभो ! ॥ १८

धात्री रैवतकोत्तमाङ्गसुभगा सेयं सुराष्ट्राभिधा,
भूमिः कौतुकधाम नाम न कथं सौभाग्यभङ्गी विभोः ।

यस्यास्त्वं सुमनःसमूहमहिमाऽऽरम्भोद्भवेः सौरभो,
मूर्द्धन्यश्रियमाश्रितः प्रतनुषे धम्मिल्ललीलायितम् ॥ १९

त्वल्लावण्यसुधामधीश ! धयतां नेत्राम्बुजद्व्यञ्जलं,
यन्नृणामनिमेषता तदमरश्रीवर्णिकाढौकनम् ।
यत्त्वेते किल विस्मयाकुलतया मूर्द्धानमाधुन्वते,
तन्मन्ये शिवसौख्यलीनमनसो वाञ्छन्ति नैतामपि ॥ २०

स्वामिन् ! यौजनिकीं तव त्रिजगतामाकर्ण्य कर्ण्यामुभा-
कर्ण्या(?) कीर्णसुधावितीर्णविशदश्रीभारतीं भारतीम् ।
यैस्तिर्यग्भिरपि प्रशान्तहृदयैस्त्यक्तः स वैरज्वर-
स्तेषां नाथ ! कथं तु पुण्यमहसां माहात्म्यमाशास्महे ॥ २१

रे कन्दर्प ! सदर्पमर्पयसि किं बाणानि बाणासने,
सन्नद्धो मधुनापि सार्द्धमधुना धिक् किं सुधा धावसि ।
चेतो रैवतदैवतप्रभुपदानुध्यानतो मन्यते,
यन्मे जैत्रमपि त्वदस्त्रममरास्त्रेणं तृणायापि न ॥ २२

रोहन्मोहमहाद्भुतं गुरुतरद्वेषद्द्विषद्दूषितं,
स्फुर्जज्जागररागसागरमरे किं भ्राम्यदुत्ताम्यसि ।
चेतश्चिन्तय चिन्मयं मधु-सुधामाधुर्यवैधुर्यकृत्,
तल्लोकोत्तरसम्मदप्रदमहो श्रीनेमिसञ्ज्ञं महः ॥ २३

श्वैरं किं मद ! माद्यसि स्फुरति ते कः क्रोध ! योधक्रमः,
श्रेयोघस्मर ! विस्मर स्मर ! शरान् मा त्वं मदः संमद ! ।
भोः किं लोभऽविलोभनैरपकुरु त्वं मान ! मानं प्रभु-
र्युष्मद्वर्गनिसर्गनिग्रहपटुः श्रीनेमिरग्रे यतः ॥ २४

बीजाकृत्य तव क्रमाम्बुजनखज्योत्स्नाङ्कुरध्यानतो,
ये दोषोपशमेनमानसमहीमेतामुपस्कुर्वते ।
तेषामन्तरनन्तमभ्युदयते नित्योपयोगं जगद्-
द्योति-ज्योतिरसीमसम्मदभरस्थूलंभविष्णुः प्रभो ! ॥ २५

स्वामिन् ! विश्ववतंस ! तं समधिकाऽऽनन्दा [न] वद्यं गिरिं,
यद्यारूह्य भवेयमद्भुतभवद्ध्यानैकतानव्रतः ।
आस्तां तच्चतुरम्बुराशिरसनासाम्राज्यलक्ष्मीरियं,
श्रीमन्नेमिजिनेन्द्र ! [नेन्द्र] पदवीमप्यऽर्थये तामहम् ॥ २६

दुःखैः खेलतु जन्म सज्जतु जरा गर्जन्तु गर्वै रुजो,
मृत्युर्माद्यतु दुर्गतत्वमुदयत्वेका त्वियं निर्मला- ।
मा श्रीनेमिजिनेश ! नेशदनिशं त्वत्पादपद्मद्वयी,
भक्तिर्भग्नगतीन्यमूनि न यतः सर्प्पन्ति दृप्यन्त्यपि ॥ २७

चेतश्चेतयते तदेव कृतिनां श्रेयस्करौ तौ करौ,
तन्नित्येक्षणमीक्षणाम्बुजयुगं वाणी च सा वाणिनी ।
सच्चारित्रवहित्र ! तत्रभवतोऽनुध्यानसेवाञ्जलि,
व्यालोकस्तुतिकीर्त्तनानि भवतो यान्यन्वहं तन्वते ॥ २८

तेषां [सा] सुरभिर्न कामसुरभिः स्वल्पः स कल्पद्रुम-
श्चैतन्यानुचितः स चिन्तितम [त] श्चित्तेऽपि नाऽऽरोहति ।
मध्ये मानसमभ्युदेति कृतिनां येषामशेषार्त्तिहन्-
नित्यानन्दमरन्दमन्दिरमिदं त्वत्पादपद्मद्वयम् ॥ २९

मुक्तिः स्वामिसमानमानमलिना कस्यास्तु कामास्पदं,
लक्ष्मीस्तु त्वदुपास्तिसंवनकरी केयं वराकी ततः ।

याचे चञ्चलचञ्चरीकचरितं चेतश्चिरं दुस्तर-
ध्वस्ताऽस्तो कमलत्वदंह्रिकमलक्रोडे परिक्रीडताम् ॥ ३०

पूर्वं पर्वतदुर्गमग्रिममधिष्ठायोग्रसेनात्मजा,
मुख्यानां मदनादिकाऽऽन्तररिपुश्रेणीमजैषीर्यथा ।
अंहःसंहतिमुज्जयन्तमचलं चित्ताचलं त्वं तथा,
तिष्ठासुर्ननु किं नतां विजयसे नः क्षिप्रमेव प्रभो ! ॥ ३१

एष ब्रह्ममहःस्तवस्तवकृतो ब्राह्म्यैव भक्त्या गुरु-
प्रीत्या विश्वजनीनकेवलमहं हंसस्तदीयास्पदः ।
नीरक्षीरविवेककौशलबलात् त्यक्ताऽबलव्यापृति-
र्भूयासं भवदीयशासनपयःसौहित्य नित्योत्सवः ॥ ३२

पू.आ.श्री सुदर्शनसूरिविरचितः

## १३. ॥ श्रीनेमिनाथस्तवः ॥

(उपजाति)

सिद्धाञ्जनानीव तवाङ्गभासः, शुभात्मनां लोचनगोचरं गताः ।
अतुल्यकल्याणनिधानमाप्तुं, क्षमागतात्मीयभवौकसौ भुवः ॥१

अग्रे समग्रैः करणैर्युतानि, पुराणि साद्र्धं विषयैश्च भूरिशः ।
भुक्तानि मोहप्रभुशासनेन,
बभूव पूर्वाजितर्भुक् परं प्रभो ! (भुः) ॥ २

यत्रापि कुत्रापि यथा तथापि, त्वमेकदापि स्वपदप्रदानात् ।
प्रसीद मे नूतनसेवकस्य, यथाऽच्युतश्रीरचिराद् भवामि ॥ ३

अनन्तजन्तूद्वमितासु पुद्गलश्रेणीषु कुर्वन् परिकीर्तनानि ।
उच्छिष्टभुक् काक इवाभवं प्रभो !,
ततो ममेतद्विरहं विधेहि ॥ ४

क्षिप्त्वेश ! मूषास्विव मां कुयोनिष्वशीतिलक्षासु चतुर्युतासु ।
दुःखाग्निनाऽतापयन् मोहवादी, कुभावनातो रसवन्न सिद्धः॥५

कर्माऽनलध्मातमदात्मलोहगोलं ज्वलन्तं कृपया कृपालो ! ।
प्रसीद निर्वापय वाग्द्विपञ्चाशत्काख्यसच्चन्दनशीकरेण ॥ ६

उद्धामधाम्नोत्तमयौवनाख्यग्रामे वसन्तं त्रिजगत्प्रभो ! माम् ।
उपद्रवन्मन्मथपाद्रिकोयमनार्यवर्यः कथमेष वार्यः ॥ ७

मध्ये भवाम्भोनिधिमार्गमाविश्चकार चित्रं चणेन गम्यम् ।
भव्याङ्गिनो येन सुखेन यान्ति,
सौख्याकरे मोक्षपुरेऽधिवस्तुम् ॥ ८

कृशानि कर्माणि करोति पुष्टान्यसौ ममात्मा यदनात्मनीनः ।
पञ्चाननं काननवासिनं रुजा ग्रस्तं प्रशस्तं कुरुते तदुच्चैः ॥ ९

अस्मादृशान् मोचय मोहसक्तान् संसारकारागृहतः स्थितिज्ञः ।
सम्प्रत्यथैतस्य जगत्त्रयस्य,
साम्राज्यवान् नाथ ! यतोऽभवस्त्वम् ॥ १०

साग्रे च गव्यूतिशतद्वये ते,
हन्ता भवेत् कस्य च नोऽपि क्रोधात् ।
हन्ये कषायैर्विषयैस्तथाहं,
नतं प्रभो ! त्वं किमुपेक्षसे माम् ॥ ११

अहं सुपुण्यद्रविणानुमानतः पराध्यर्मध्याधमजन्मवेश्मसु ।
उदास संसारपुरे पुरा प्रभो !, महोदयाप्तिर्न परं ममाभवत् ॥१२

यावद्भवाब्धौ जलजन्तुतन्तुश्चित्तद्विपं न क्षिपति स्मरो मे ।
त्राणाय तावज्जलकान्तरत्नदेश्यं प्रभो ! तस्य दिशोपदेशम् ॥१३

निश्शेषदोषव्यतिषङ्गमुक्ते, ये नाथ ! दोषं त्वयि पोषयन्ति ।
कर्पूरपूरे कुमुदेन्दुगौरे, ते कालिमानं कुदृशो दिशन्ति ॥ १४

समूलमुन्मूलितबोधपङ्कजं, विपुण्यहंसं मम नाथ मानसम् ।
करोत्यखर्वः स्मरवारिकुञ्जरः
कथं विमथ्यस्तदसौ सुदुर्द्धरः ? ॥ (वंशस्थ) १५

अपारसंसारमहार्णवान्तरे, श्रेयःस्वमादाय कषायतस्करैः ।
नृजन्मपोतादवतार्य निष्कृपैः,
प्रक्षिप्यमाणं जिन ! रक्ष रक्ष माम् ॥ १६

मदान्धमोहद्विपराग–दोषदन्ताभिघातेन निपीड्यमानम् ।
स्वामिन् ! मृगेन्द्रासनमाश्रितोऽपि,
न त्रायसे किं निजसेवकं माम् ? ॥ १७

स्वामिन् ! भवग्रामटिकानिवासी, मुहुर्मुहुर्वामकरग्रहेण ।
(घूर्णायितो) मोहमहीभृताऽहमितस्ततो मोचय मां कथञ्चित् ॥१८

उल्लङ्घितो गोष्पदवद् भवाब्धिस्त्वया प्रभो ! तत्र तु मां पतन्तम्।
अनुद्धरन् नाथ ! कथं मम त्वं, बन्धुस्ततो बोधवतां विधेहि॥१९

बाल्याद् भवच्चित्रचरित्रचित्रां, मच्चित्तभत्तिं भगवन् ! समेत्य ।
तारुण्यवर्षासमयाप्तपूर्वं कन्दर्पजीमूतरसः प्रमार्ष्टि ॥ २०
(इन्द्रवज्रा)

कुले समानेऽप्यहमग्रजोऽपि, वृक्षोऽभवं चम्पकपत्रकल्पः ।
जातोऽसि तत्पुष्पमिवानुजोऽपि,
त्वं तु प्रभो ! विश्वशिरोवतंस ! ॥ २१

श्रीश्रीपतिस्तव पदद्वयमुग्रकान्ति,
लब्ध्वा जगत्त्रयपते ! विमलावलोके ।
सूरिः सुदर्शननिरस्तभवोद्भवारिः
कृत्वा स्तवं प्रणमति स्म गताऽद्य भूतिः ॥ (वसन्ततिलका)२२

पू. आ. श्री. रत्नाकरसूरिविरचितम्

## १४. ॥ रैवताद्रिमण्डनश्रीनेमिजिनस्तोत्रम् ॥

(वसन्ततिलका)

श्रीरैवताद्रिकमलापृथुकण्ठपीठ-
शृङ्गारहारतुलनां कलयन्ति यस्य ।
स्फारस्फुरत्क्रमनखद्युतयोऽतिदीप्राः
श्रीनेमिनं जिनवरं तमहं स्तवीमि ॥ १

नेमे ! तव स्तवनमुज्ज्वलकेवलात्म-
रूपस्य गीष्पतिसमोऽपि न कर्तुमीशः ।
अन्तस्तथाऽपि परितोऽपि हि विस्फुरन्तीं
लोलां करोति तव भक्तिरियं विलोलाम् ॥ २

काले कलौ किल निदाघतुलां दधाने
निःशेषसंवरपदेषु तनूभवत्सु ।
रोचिर्जलैः सुविमलैः सरसीयतेऽसौ
देव ! त्वदंह्रियुगलं(युगली?) भवतापभेदि ॥ ३

येनोच्छदच्छविपदं विपदन्तकारि
नेमे ! विभो ! शुभवतो भवतोंऽह्रियुग्मम् ।
यायादसौ नरमणी रमणीयभावं
केषामहो सुमनसां मनसां न लोके ? ॥ ४

रागादिविद्रुतमना नहि ना त्वदीयं
द्रष्टुं स्वरूपममलं तदलम्भविष्णुः ।
किं नीलिकागलितलोचनशक्तिरुच्चैः
पश्येत् कदापि विलसत् शशलक्ष्मबिम्बम् ॥ ५

दृष्टेऽधुना तव पदाम्बुरुहे पलायाञ्-
चक्रेऽन्तरङ्गरिपुचक्रमिदं हृदो मे ।
विश्वं विवस्वति विभासयति प्रभाभिः
को वान्धकारनिकरस्य किलावकाशः ? ॥ ६

कल्पद्रुमः प्रकुरुतां किमभीष्टजातं ?
कस्याऽस्तु वा सुरमणी रमणीय एषः ? ।
कृत्वाऽथ किं भवतु कामदुघाऽप्यमोघा ?
सङ्कल्पिताऽधिकफलं समवाप्य नेमिम् ॥ ७

मायानिशि स्फुरितमोहमहाप्रमीला-
सम्मीलितं नयनमान्तरमेतदीश ! ।
विश्वत्रयप्रकटनाय पटीयसीभिर्-
गोभिः प्रबोधकलितं यदि तावकीभिः ॥ ८

भालं विशालमिदमिन्दुकलाऽभिरामं
किं वर्ण्यते त्रिदशवन्दितपादपद्मम् ! ।

नैवं व्ययं लवणिमाऽमृतमेति यत्र
पेपीयमानमपि नेत्रचकोरवृन्दैः ॥ ९

काऽपि प्रभो ! तव विशालविलोचनानां
छायाकपोलयुगलं कमनीयकान्ति ।
कर्णद्वयं त्रिजगतीकमलाविलास-
दोलाकलं बत न कस्य मुदं दधाति ॥ १०

कलिमलकलुषानां प्राणिनां पावनी ते
विमलरुचिजलौघैः पूरिता मूर्त्तिरेषा ।
अमरसरिदिवाऽलं पापजम्बालजालं
विदलयति विशालं देव ! मे सर्वकालम् ॥ (मालिनी) ११

त्रिदशपुरपुरन्ध्रीरूपरेखाविषाद-
क्षमलवणिमलीलां भोजपुत्रीं विहाय ।
कलितविरतिभावः पावयामास नेमे !
निजचरणसरोजैस्तं भवान् रैवताद्रिम् ॥ (मालिनी) १२

सिर(त)करकराकारा कीर्त्तिर्न मे हृदयप्रिया
सकलललनालीलालापा विलापसमा मताः ।
विपुलवसुधाराज्यं प्राज्यं विपाककटु स्फुटं
तदलमिमकैर्नेमे ! भूयस्त्वमेव विभुर्मम ॥ (हरिणी) १३

इति विलसदनङ्गसङ्गभङ्ग-
प्रगुण-समाधिधरो मयाऽभिनूतः ।
स्फुरदतिशयचारुरत्न रत्ना-
कर गुरुरेष शिवङ्करोऽस्तु नेमिः ॥ (पुष्पिताग्रा) १४

पू.आ.श्री विजयसिंहसूरिविरचितम्

## १५. ॥ श्रीनेमिजिनस्तवनम् ॥

नेमिः समाहितधियां यदि दैवयोगा-
च्चित्ते परिस्फुरति नीलतमालकान्तिः ।
तेषां कुठार इव दूरनिबद्धमूल-
दुष्कर्मवल्लिगहनं सहसा च्छिनत्ति ॥ (वसन्ततिलका) १

जय त्वं देवेश ! त्रिभुवनपते ! शान्तहृदय !
त्रिलोकीसङ्कल्पद्रुमवरकृपाकार ! वरद ! ।
समुद्धर्तुं मिथ्याजलधिलहरीतः क्षणमितो
मयि द्रोणीदीर्घां जिन ! सकरुणां निक्षिप दृशम् ॥(शिखरिणी) २

(शार्दूलविक्रीडित)

पूजापत्रचयैर्निरन्तरलसत्पत्रावलीमण्डितो
नानावर्णसुगन्धिपुष्पनिकरैः सर्वत्र यः पुष्पितः ।
पादान्ते परिणामसुन्दरफलैः सम्भूषितः सर्वतो
नेमिः कल्पतरुः सतामविकलं देयात् तदग्र्यं फलम् ॥ ३

आश्चर्यं भुवनैकभूषण ! भवान् कल्पद्रुमः पण्डितैः
सिक्तो भक्तिजलेन तो(ते)षु कुरुते थो(क्षे)माङ्कुरं यत् किल।
एतस्मादपि चित्रमेतदपरं नेमे ! दुरापं सुरै-
रुच्चैर्यत् तदपि प्रशान्तमतिभिर्नम्रैः फलं प्राप्यते ॥ ४

उद्यन्मोहमहान्धकारतरणिस्त्रैलोक्यचिन्तामणि-
र्नित्यानन्दपदक्रयाणविपणिर्लोकाग्रभूषामणिः ।
निर्वाणैकपुरप्रयाणसरणिः सज्ज्योतिरेकारणी
दिश्यान्नेमिजिनः स किङ्करसुरश्रेणिः सतां मङ्गलम् ॥ ५

धन्यैः कैश्चन धीरसंस्तुतगुणः पापैः पुनर्नन्दित-
स्तुल्या तेषु तव प्रवृत्तिरिति ते श्लाघ्यैव नीरागता ।
तेषां यत् तु शुभाशुभेन घटना तत्रासि हेतुः कथं
को जानात्यथवा जगत्त्रयपते ! तत्त्वं जिन ! त्वादृशम् ॥ ६

देव ! त्वं गतबन्धनः प्रविदलन्निःशेषकर्मस्थितिः
पूर्वस्वीकृतभग्नदुष्टफलकः पोतस्तथाप्यद्भुतम् ।
त्वामाश्रित्य गतागतैर्विरहितं संसारवारान्निधिं
तीर्णाः केऽपि तरन्ति केचन पुनश्चित्रं तरिष्यन्ति च ॥ ७

रामाक्रान्ततनुस्तथा बहुमरुत्संसर्गतश्चञ्चलः
किञ्चान्तर्ज्वलति प्रकाममपरं कुग्राहसत्त्वाकुलः ।
अम्भोधिश्चुलुकाकृतिः कथमसौ त्रैलोक्यविस्तारिण-
स्ते साम्यं लभते सुवृत्तविलसन्मुक्तालयो यद्यपि ॥ ८

मूर्तिस्ते जगतां महार्त्तिशमिनी मूर्त्तिर्जनानन्दिनी
मूर्त्तिर्वाञ्छितदानकल्पलतिका मूर्त्तिः सुधास्यन्दिनी ।
संसाराम्बुनिधिं तरीतुमनसां मूर्त्तिर्दृढा नौरियं
मूर्त्तिर्नेत्रपथं गता जिनपते ! किं किं न कर्तुं क्षमा ? ॥ ९

किं तत्रास्ति निरन्तरं न भवतः सङ्गः कुरङ्गीदृशां
किं वा तत्र विभो ! पयोधरपरिष्वङ्गोऽपि नाल्हादकः ? ।
यन्मामत्र विहाय निर्वृतिमना नाथोज्जयन्ते गतः
पायाद् वोऽमि(भि ?) हितः
स भोजसुतया देवः शिवानन्दनः ॥ १०

अत्यन्तं यदि जीवितादपि विभो ! नीरागता वल्लभा
तत् किं सिद्धवधूसमागमविधौ त्वं खिद्यसेऽहर्निशम् ? ।

यद्येतद् द्वितयं प्रियं वद मया कस्तेऽपराधः कृतो ?
जल्पन्ती गणितोग्रसेनतनया नो येन सोऽस्तु श्रिये ॥ ११

श्रीमन्नीलतमालकज्जलघनच्छायः सुधाशीतलो
व्यालोलक्षणदीर्घिकः प्रतिपदं हेमाम्बुजैः पूजितः ।
त्वं संसारमरौ निरन्तरमहादुःखाकुले देहिनां
मार्गः स्वर्गपुरस्य नाथ ! विततः किंवाऽपवर्गस्य च ॥ १२

शुक्लध्यानसरो विनीलनलिनाकारोऽपवर्गद्रुम-
च्छायाबन्ध इवैककेवलिदृशोर्मध्ये स्फुरत्तारकः ।
नीलाश्मप्रभवत्तदेकममलं पात्रं परं ज्योतिषः
कुर्याद् योगबलच्छविः सुकृतिनां नेमिर्विशुद्धं पदम् ॥ १३

आकर्णायतयोर्विनीलनलिनश्वेताम्बुजाप्तश्रियोः
किञ्चिन्मन्थरयोर्मनाग् मसृणयोरुद्वृत्तसत्तारयोः ।
कारुण्यामृतसारिणीसरलयोः संसन्धयोः सर्वदा
नेमेर्यामि बलिं दृशोऽस्तु वसुधाश्वेतच्छटाच्छाययोः ॥ १४

त्रैलोक्यालम्बदण्डः परमपदगृहारोहनिःश्रेणिदण्डः
कन्दर्पाघातदण्डो भवजलधिपतेर्देहिनां सेतुदण्डः ।
दोर्दण्डः पातु नेमेर्नरकपुरमहाद्वाररोधैकदण्डः
सद्धर्माधारदण्डो हरिनिबिडकरात् कर्षणान्दोलदण्डः ॥ १५

(स्रग्धरा)

एते मूढधियो वदन्ति किमपि स्वामिन् ! मदीयं मन-
स्त्वेवं कल्पयते त्वमेव भुवने देवाधिदेवः परम् ।
यत्रैतानि जगन्ति जातविविधव्यावर्त्तनोद्वर्त्तन-
व्यापाराणि परिस्फुरन्ति सततं विज्ञानरूपे त्वयि ॥ १६

रागद्वेषविसंस्थुलेन मनसा यत्किञ्चिदासेवितं
जन्मन्यत्र परत्र वा गतिवशात् तैस्तैरुपायैः स्तुमः ।
तत् सर्वं जिनचन्द्र ! सर्वगमहाज्योतिःस्वरूपे त्वयि
प्रत्यासत्यमुपागते हृदि कथं बध्नाति नित्यस्थितिम् ॥ १७

यस्यान्ते शशिभास्करप्रभृतयः सूक्ष्माणुगः सर्वगं
यल्लोकत्रयभास्करद्युतिः पुनः सूक्ष्मं न यद्वीक्ष्यते ।
यत्कर्मेन्धनदाहदारुणमिदं निर्वाणगं देहिनां
तज्ज्योतिर्जगदेकवन्द्य ! गुणिभिस्त्वं योगिभिर्गीयसे ॥ १८

यत्रैष स्मरभिल्लभल्लिनिकरः कल्पान्तकालानल-
स्पर्द्धिक्रोधदवानलः पुनरियं यस्मिन् जरा राक्षसी ।
यत्रायाति पुरो महाभयकरः पञ्चत्वपञ्चानन-
स्तेषां तद् भवकाननं भयकरं त्राता न येषां भवान् ॥ १९

देवाकृष्य करेण केसरिपदं दन्ती कपोलस्थलीं
कण्डूयत्यहिरेष बभ्रुपुरतो मार्गं निरुध्य स्थितः ।
व्याघ्रं व्यात्तविशालवक्त्रकुहरं जिघ्रत्यजस्रं मृगो
यत्रैवं पशवः प्रशान्तमनसस्तामर्थये त्वद्भुवम् ॥ २०

चेतस्तावदपारनिर्मलगुणाम्भोधौ निमग्नं मुदा
चक्षुस्त्वद्वदनावलोकनवशाद् बाष्पाम्बुपूरप्लुतम् ।
नो वाचामिह मादृशामहरहः प्राप्तोऽप्यनल्पैनसा
न ध्यातो न विलोकितो न च जिन !
स्तोत्रैः स्तुतः स्वेच्छया ॥ २१

निःसङ्गोऽपि निरुत्सुकोऽपि निरहङ्कारोऽपि निर्वागपि
त्यक्त्वा शेषममत्वबुद्धिरपि यत्त्वं वीतरागोऽपि सन् ।

त्वं स्वामित्वमनिन्दितो गुरुरसि त्वं मे पिता जीवितं
मिथ्यास्मिन्नपि चेन्ममास्ति गदिते त्वन्मे प्रमाणं भवान् ॥ २२

सम्यग्ज्ञानविहीनमूढमतयस्तत्त्वानभिज्ञा वयं
तत्त्वप्रीतिमतो नरस्य नियतं मुक्तिश्चरित्रात्मनः ।
हेतुः सर्वसमीहितस्य भवतः पादप्रसादः परं
तस्माद् देव ! भवे भवे मम भवेत् त्वत्पादसेवासुखम् ॥ २३

इति जगति दुरापाः कस्यचित् पुण्यभाजो
बहुसुकृतसमृद्ध्या सम्भवन्त्येव वाचः ।
जिनपतिरपि यासां गोचरे विश्वनाथो
दुरितविजयसिंहः सोऽस्तु नेमिः शिवाय ॥ (मालिनी) २४

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि शक्रसंदृब्धः

## १६. ॥ श्रीनेमिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

नमस्तुभ्यं जगन्नाथ !, विश्वविश्वोपकारिणे ।
आजन्मब्रह्मनिष्ठाय, दयावीराय तायिने ॥ १

दिष्ट्या कर्माणि घातीनि, स्वामिन् ! घातितवानसि ।
शुक्लध्यानेन दिवसै-श्चतुः पञ्चशतापि हि ॥ २

न केवलं यदुकुलं, त्वया नाथ ! विभूषितम् ।
इदं जगत्त्रयमपि, केवलाऽऽलोकभास्वता ॥ ३

अस्ताघो यस्तथा स्वामि-न्नपारश्च भवाम्बुधिः ।
गुल्फगोष्पदमात्रं स, स्यात्त्वत्पादप्रसादतः ॥ ४

सर्वस्य भिद्यते स्वान्तं, ललनाललितैः प्रभो ! ।
अभेद्यो वज्रहृदय-स्त्वत्तो नान्यो जगत्यपि ॥ ५

त्वयि व्रतनिषेधिन्यो, बन्धूनां ता गिरोऽधूना ।
भवन्ति पश्चात्तापाय, तवर्द्धिं पश्यतामिमाम् ॥ ६

दुराग्रहैर्बन्धुवर्गै-र्दिष्ट्या न स्खलितस्तदा ।
जगत्पुण्यैरस्खलितो-त्पन्नकेवल ! पाहि नः ॥ ७

यत्र तत्र स्थितस्याऽपि, यद्वा तद्वाऽपि कुर्वतः ।
त्वमेव देव ! हृदये, भूयाः किमपरेण मे ? ॥ ८

पू.आ.श्री जयशेखरसूरिविरचितानि

## १७. ॥ श्रीनेमिनाथछंदासि ॥

सिद्धिवधू-हृदयस्थल-हारं, भूषित-सुरतरु गिरि-गिरनारम् ।
जित-रागादिक-रिपु-संभारं, वर्द्धित-सुर-द्रुम-वितरण-भारम्॥१

यदुकुल-शृंगारं सुगुणागारं, विशदाचारं सघनघनम् ।
संहृतसंसारं सुरगिरिसारं, त्रिभुवनसारं ज्ञान-धनम् ॥ २

निहताहंकारं विगति विगति विकारं, सुभगाकारं गत-वृजिनम्।
कृत-दुःकृत-मारं मर्दितमारं, नेमिकुमारं नमत जिनम् ॥ ३

इन्द्रिय-दमदक्षं मदन-विपक्षं सितगुण-लक्षं मुक्तमदम् ।
विशदोभय-पक्षं जल-दुर्लक्षं, महिम वलक्षं पुण्यपदम् ॥ ४

सुकृत प्रत्यक्षं, जलद सदृक्षं, नत-नर-यक्षं नय-भवनम् ।
जित-पातक-कक्षं भुवि सुरवृक्षं, सर्वसमक्षं नमत जिनम्॥५

अधिगत भवतीरं कृष्ण-शरीरं, जलधिगभीरं भुवनगुरुम् ।
रेवतगिरि हीरं भवदव-नीरं, दुःख-समीरं गरिमगुरुम् ॥ ६

दित-कुमत-करीरं, गिरिवरधीरं, हतमदवीरं प्रचुरदयम् ।
मायावनि सारं सिववनि कीरं, हरिवद भीरं विगतभयम् ॥७

सुरकृत-संगानं विमल-ध्यानं सिद्धिवरम्
विदिता भयदानं कुशल-निदानं, लसदव-दानं दोषहरम् ।
जितमेन समानं घन-महिमानं, गुणैरमानं भक्तजनाः,
नत्वानुपमानं शर्म्म निधानं मुक्तिस्थानं भजत जनाः ॥ ८

मदिर दुरित पयोद पटल पाटन पवन प्रभ,
रुचिर ताल दलनील कमल कज्जल काय प्रभ ।
तुंग तरल तर तरुण मोहतरु मर्दन कुञ्जर,
गणनाति गमन गण गरिष्ठ निखिल खंडित भव पंजर ।
षट्पद पटिष्ट पाद प्रथम वर्ण विदित सूरि प्रणत,
जय जगति नेमि जिनवर विमल कीर्ति सकल लोक प्रथित ॥९

पू.आ.श्री जयशेखरसूरिविरचितानि

## १८. ॥ श्रीनेमिनाथच्छंदासि ॥

अभिलषित-दान-दक्षं रक्षित मर्याद यादवमपक्षम् ।
लक्षित-लक्षण-लक्षं नमन्तं श्री नेमिमविपक्षम् ॥ १

पक्षावसान् क्षाम शशधर मित्र तार पराभवं
भवभुवन पर्वत गर्व तर्जित कीर्ति धवलिम कलरवम् ।
कन्दर्प दर्पच्छेद मेदर मदुर मविदर दूरितं,
श्री नेमिमञ्चत जिनमनेन समेन मानत दैवतम् ॥ २

स्फटिक गिरि बद्धरङ्ग प्रकट जटाजूट कोटि घृत गङ्गम् ।
भुजग भयङ्कर कायं जिगायजः शंभुमधि जापम् ॥ ३

जायन्त एते भक्त भोगाय स्य तोषादिविरतम्
तमकषट् दिक्पट मट्टहासप्स्याढ पाटित पर्वतम् ।
पणतिरतसुर भट कोटि दुर्घट कालकूट निषुदनं;
चिरकुपित चण्डी चाटुकारम् यश्चकार कपर्दिनम् ॥ ४

प्रलयौघृत भूगोलं दानवकुल केल कवल ने विलोलं ।
येन समं मधुमथनं कथयामि कथं रुचिरापघनम् ॥ ५

घनरुप गाढ विमूढर गर्व ग्रन्थि गोपी रञ्जनं,
निश्वास कंसव्यालकालिय भौम भुजबल भञ्जनम् ।
धनन्नाथ निर्मित नव्यनगरी नित्य निवसन् लालसं;
चक्रे चतुर्भुजमपि चिरञ्जय संप्रहारक लालसम् ॥ ६

आरुढ हेम हंस दिन रजनी जात सृष्टि विध्वंसम्,
जो वेद वचन सदनव्यधत्त वश्यं चतुर्वदनम् ।
सुदनभरि नाभिक्रोड निर्गत कमल कुडमल निश्चलम्,
सुरपक्ष पन्नग पुरुष योषित दुर्गसर्ग निरर्गलन् ॥ ७

रुचि निचित वदन चतुष्क, परिचय रुचिरवेद चतुष्टयम् ।
जित्वा विरञ्चि जो जनैङ्घ, रचय तिस्म सविस्मयम् ॥ ८

तं सुललित रति कलितं, विजये भुवनत्र्यान्तरांस्खलितम् ।
विषमपघन विषमसरं, कृत सुखधृत मुखमुखा शशिरम् ॥ ९

सुर मौलि मौलि मरालमाला, लालितक्रमपङ्कजं निजयोध;
योषित लोल लोचन मित्र मीनमय ध्वजं ।
कन्दर्पमय हतदर्प मायावारि, वर्ज्य सनाथनं,
यः सूरि केशरि बिरुद मापन ममत प्रभु नेमिनम् ॥ १०

जगति सुगति संगति निदान, निजगति जिन सुन्दर,
यदुकुल कमल मराल सज्जल जलदच्ववी सुंदर,
सेवक जन सुरसाल काल कवलित जन रक्षण,
खल परिकल्पित कूट कूट तिमिर क्षपण ।
रति सुख विमुख ऋषि समूह सन्नत् चरण,
पादाब्जलग्नसूरि प्रणत नेमिनाथ जय गौरगुण ॥ ११

पू.आ.श्री रत्नप्रभसूरिविरचितम्

संस्कृत-प्राकृत-शौरसेनी-

भाषात्रितयनिबद्धम्

## १९. ॥ श्रीनेमिजिनस्तोत्रम् ॥

अमन्दभन्दोदयकन्दसारं, संसारपारीणमरीणसारम् ।
इन्द्रावलीकैरववृन्दचन्द्रं नेमिं नमंसामि चिरं वितन्द्रम् ॥ १
(उपजाति)

उत्तालकोलाहलकाहला वा, नन्दन्तु हे देव ! नरा भवन्तम् ।
कामं महाभावसमुद्धरा वा, नुवन्तु चित्तं भविनो विभिन्नम् ॥२
(उपजाति)

विमलमङ्गलमण्डलमन्दिरं, निबिडडिम्बविडम्बसुडम्बरम् ।
चरणवारिरुहं रिणरीणते, परिरुणद्धि विरुद्धधियं मम ॥ ३
(द्रुतवि.)

कुसुमबाणकुलीरनिमीलिरे, विरहमोहपरं सहसा नरं ।
परमनेमिपरायणधारणा मम सहा न चिरं तव सङ्गमे ॥ ४

चन्द्रचारुकिरणावलीवरच्छायदन्तकरसुन्दरोदय ! ।
नेमिकुञ्जर ! दुरन्तदारुणं किं न हंसि भव पंजरं मम ॥ ५
(रथोद्धता)

कामकेलिकलहच्छलाविले, मत्तमोहमरिमामहाभरे ।
देव ! देहि करुणा तरङ्गिणी, चारुचित्तमरुजन्तु मण्डले ॥ ६
(रथोद्धता)

तालीतमालदलकज्जलनीलभासं,
निःसङ्गरङ्गगुणचित्तनिबद्धवासम् ।
उद्दामधामधरमुद्धरधीरभावं,
नेमिं नमामि भवसिन्धुसुसन्धिनावम् ॥ (वसन्ततलिका) ७

आबद्धबन्धुरविलाससमिद्धसिद्धि,
सम्बन्धबद्धविसबन्धुतमाभिसन्धिम् ।
हिंसासरोरुहसमूहमहारिमानं,
नेमिं नमामि नवभाववरो भवन्तम् ॥ ८

कुवलवलयनीलं वेणिदण्डं वहन्ती,
तरलतरलतारामण्डलं सारयन्ती ।
तरुणकिरणजालं कङ्कणाली करालं,
सरलमलसयन्ती बन्धुरं बाहुदण्डम् ॥ (मालिनी) ९

करकुवलयभङ्गी चारुसञ्चारचारी,
चरणकरणकेली कोमला कम्बुकण्ठी ।

नवलवणिमलीलाहारिणी हारिणी सा,
गरलमिव निबद्धा देवरामा पुरा ते ॥ (यु.) (मालिनी) १०

महाबाणाऽऽसारे हरिकरिकरे कालकलिले,
कराले हुंकारे करणवरवीरं रणभरे ।
चिरं चित्तासङ्गी तव चरणराजीवरमणे,
जयं धीरो धत्ते धवलगुणसंसंगसुभगम् ॥ (शिखरिणी) ११

अपारे संसारे समहिमसमीहाभरसहे,
हहा हिंडे भूयोऽनुड निविडपीडाजडरसं ।
दयालोऽदंभाले तरुणतरणे पङ्कहरणे,
सहेनाहं नेमे ! चिरममरसं पाहि सरसा ॥ (शिखरिणी) १२

कलिमलजलाऽऽसारे रामातरङ्गनिरन्तरे,
विरहकुरुलीवेलावासे विमोहतिमिङ्गिले ।
निविडजडिमारम्भे भीमे महाभवसागरे,
चरणकमलं ते निस्सीमं महामि तरीसमं ॥ (हरिणी) १३

बन्धो ! नेमे ! विमलकरुणानीरसंभारसिन्धौ,
नीलीनीलच्छविनवमणि सञ्चयच्छायकाय ! ।
कामं वामं कलहकलिलं कामकल्लोललोलं,
मूढं गूढं नियमयमसा मङ्गलाऽऽसङ्गिचित्तम् ॥ (मन्दाक्रान्ता) १४

समुद्धरतरा रमा निरयकंदराकारिणी,
समीरलहरीचला सरससुन्दरी सुन्दरी ।
भवे किमिव सुन्दरं दरदुन्तहेलाहरं,
विहाय तव केवलं चरणचारुपङ्केरुहं ॥ (पृथ्वी) १५

कामं कुङ्कुमपङ्कपिञ्जरतरं वन्दारुदेवावली-
चूडाचुम्बिसुचारुसञ्चयमणीसण्टङ्किटङ्कारवम् ।
नेमे ! निस्समसामधामपरमच्छिन्नच्छलायास ते,
संसेवे चरणारविन्दमसमं भूमण्डलीमण्डनम् ॥(शा.वि.) १६

यः संस्कृतप्राकृतशौरसेनभाषाभिरामिस्तिसृभिर्निबद्धाम् ।
एनामधीते स्तुतिमेष मान्य, रत्नप्रभोऽभीष्टघटापटुः स्यात् ॥१७
(इन्द्रवज्रा)

पू.आ.श्री जयसुन्दरसूरिविरचितम्

अष्टभाषानिबद्धम्

## २०. ॥ श्रीनेमिजिनस्तवनम् ॥

(द्रुतविलम्बित)

संस्कृतम् -

परमभक्तिपरीतपुरन्दर !, स्तुतपदद्वय ! नेमिजिनेश्वर ! ।
जलदनीलरुचेस्तव संस्तवं, विरचयामि सुवासनया नवम् ॥१

सुरगुरुप्रतिमोऽपि धिया नरस्तव गुणान् गदितुं क इहे(वे)श्वरः।
चरमनीरनिधेर्लहरीगणं गणयितुं गणकोऽपि किमु क्षमः ॥ २

समसंस्कृतम्-

करणकुञ्जरकेसरिदारुणं बहलमोहमहीरुहवारणं ।
चरणतामरसं नरसत्तमा महिमधाम नमंति न के तव ॥ ३

गुणमणिगणरोहणरोहणं कुसमयाऽसमरेणुसमीरणं ।
चिरमहं महयामि महादयारसमयं समयं तव देव ! हे ॥ ४

प्राकृतम् –

जउकुलंबरसूरिअसो[पहा]अरं, भवियलोअचउरसुहायरं ।
सुकयपायवनीरहरोवमं, जिण ! तुमं पणमामि अणोवमं ॥ ५

सयललद्धिजुओ सुमहावई सररिऊ सइसामि ! निसेविओ ।
हवसि देव ! हर व्व तुहं पुणो, भुअणनाह ! कयावि न भेरवो ॥

शौरसेनी–

नाध चिंदामणी दावथिं(चिं) दिज्जदे,
दावदह कप्परुक्खो वि कप्पिज्जदे ।
कामधेणू वि जिण ताव कामिज्जदे,
जाव दुह पायपउमं न दीसिज्जदे ॥ (मदनावतार) ७

वदद दुरि दास दे सुकद परिपूरिदे,
सदह दुहिदे तथा सा दसद सोहिदे ।
संजणंदो जिणे गुणमहंदो सया,
जयदु भयवं भवं भुवणसिरिसामिआ ॥ ८

मागधी–

उवदिस्तशदस्तमणस्त समं भवसायलतालणलतलणिसमं ।
नदअप्पिदशुस्तिल मोक्खलमं,
[जि]ण ! धन्नयणा पणमंति तुमं ॥ (पद्धदिका) ९

ययवश्चलमश्चल–हि दशया,
शुकिवाल शशायल किल भविआ ।
हलिशेण महंति तुहं अणहे ...
शशिणं यह योण्हपि आअणहा॥ (मागधी) १०

पैशाचिका–

जय गुनगनमनिनिधि ! नेमितेव !
जय तज्जिततुज्जयमतनतेव ! ।
जय सज्जनहितपकनलिनहंस !,
जय पनतकसटतमतमनहंस ! ॥ ११

अपुरवसिरिसार ! अनंजपुंजनर ! तिन्नसंतसन ! भुवनविज्ज !॥
तुह नाममंत सरने रतने पभवंति न तोसा तलितमान ! ॥ १२

चुलिकापैशाचिका–

कतराकखनाखनप्फफं कुनताराककनं सुतुल्लफं ।
नमते चिनलाच यो तुम, लफते सो अनखं महालमं ॥ १३

चकचंतुकनान पंथवो लचनीचानिसमानकित्तिमं ।
फकवं ! फचफाचफंचने फफ बम्हानतिलेखलक्खन ! ॥ १४

अपभ्रंशम् –

साह पहाव निहाणु तेउ, सासणरहुआरुहिअ ।
नाण धणेहिं समाण के के न पहुत्ता शिवनयरि ॥ १५

तउ पयपंकय नाह भमरप्पण नर जे धरहिं ।
होइ हरियजगबाह ! तेहं जससोरहं सुरहितणु ॥ १६

सामलवन्नु मेह जिह, तउ रेहइ पहुदेहो ।
पुण्णधण्णकारण जगहं, अमियदाण गुरुपहो ॥ १७

धन्ना तेहिं नयणुल्लडां, जीहा तेहिं सुकयत्थ ।
जे तउ पस्सहिं रुव तिह ब्रुवहि जेतउ गुणसत्थ ॥ १८

समसंस्कृताष्टभाषावृत्तम् -
नंद महोदयफलदक मंदरधीरिमधर,
शमपेशलकलकुशलकोश जगति जनहितधुर ।
सुरनायकनतचलननलिन करुणातरुणीप्रिय,
विकलकेवलि ! हेलिकेलि ! कुलविमल ! कलालय ! ॥ १९

पृथगष्टभाषावृत्तम् -१
श्रेयोवल्लिवनीघनाघन १ महामोहेभकण्ठीरव, २
पज्जेहिं सुकएहि दुल्लह ! ३ भवं पत्तो मए अम्महे । ४
शंशालाशयभीलुआह ५ सततं तिज्जाहि मज्जुं ततो ६,
निष्फीते निचपातपंकचयुके ७ वासं तुह नेमिअ ! ८ ॥ २०
(शा.वि.)

इत्थं ये तव संस्तवस्रजमिमां स्पष्टाष्टभाषासुमां,
श्रीनेमे ! गुणगुम्फितां विदधति स्वकण्ठपीठेऽसमां ।
जातश्रीविजयादि-दिन्नगुरवः स्वीकुर्वते निस्तुषं,
ते प्राज्ञा घनभावनद्धर्मनसः स्वश्रेयसः श्रीसुखं ॥(शा.वि.)२१

पू.मु.श्री अभयतिलकगणिविरचितः

## २१.॥ रैवताचलतिलकश्रीनेमिजिनस्तवः ॥

विमलरैवतकाचलशेखरः
सरभसप्रणतत्रिदशेश्वरः ।
गवल-कज्जलकोमलदीधितिर्-
जयति नेमिजिनस् त्रिजगत्पतिः ॥ (द्रुतविलम्बित) १

मोक्षाध्वगाय इह रैवतकेऽधिरुह्य,
नेमे ! जगत्सुरतरो ! तव पादमूले ।
प्रीत्या वसन्ति हि भवग्रहणप्रयाणैर्-
द्वित्रैरिमे शिवपुरीं नियतं व्रजन्ति ॥ (वसन्ततिलका) २

जिनपते ! त्वयि नेत्रपथं गते,
विकसिते सुकृतैः सह मे दृशौ ।
हृदयमुच्छ्वसितं वपुषा समं,
दुरितमाशुगतं तु रसातलम् ॥ (द्रुतविलम्बित) ३

भाद्राम्बुवाहनिभदेहरुचे ! कटाक्ष-
धाराभरेण भवता मयि वर्षतेश ! ।
उत्पाटितः खलु तथा चिरकालपङ्को,
रन्तुं समीप्सति यथाऽपि हि मुक्तिकन्या ॥(वसन्ततिलका) ४

मम गृहे फलितोऽद्य सुरद्रुमो,
मम गृहे सुरधेनुररंसत ।
मम गृहे नवसेवधयोऽचिरा-
दुदघटन्त विभो ! त्वयि वीक्षिते ॥ (द्रुतविलम्बित) ५

पूर्वार्जितानि सुकृतानि फलोन्मुखानि,
जातानि मेऽद्य सुदशोज्जघटे ममाऽद्य ।
श्रीनेमिनाथ ! जिन ! लोचनगोचरत्वं,
यत् त्वं गतो बत महोदय एव मूर्त्तः ॥ (वसन्ततिलका) ६

तव विभो ! भृतकस् तव सेवको-
ऽस्मि तव कर्मकरस् तव किङ्करः ।

अमि विभो ! धनिकोऽभ्यसि नायको-
मम भवान् यदधीश ! निकामये ॥ (द्रुतविलम्बित) ७

श्रीउज्जयन्तशिखरे भगवन्नुदूढ-
दीक्षर्धिकेवलरमाशिवकेलिकान्त !
वर्धस्व नन्द विजयीभव नेमिनाथ !,
मन्यस्व मामभयतातिलक ! स्ववंठम् ॥ (वसन्ततिलका) ८

पू.मु.श्री रविसागरगणिविरचितम्
मेघदूतरीत्या

## २२. ॥ श्रीनेमिराजीमतिवर्णनम् ॥

(मन्दाक्रान्ता)

कश्चित् प्रत्यानयति मनुजो यः प्रियं मामकीनं
सर्वाभीष्टं विभवमतुलं तं प्रतीहार्प्पयामि ।
व्यक्तीचक्रे सहृदयमनःसंश्रितो वाग्विलासो-
राजीमत्याऽभिमतसुतयेत्युग्रसेनेश्वरस्य ॥ १

कष्टेनात्मप्रियविरहिता विप्रयोगानुषक्ता
नीत्वा घस्रान् किल कतिपयान् हृस्वजालान्तरालैः ।
स्वच्छच्छायां नयनसुभगामागतां सा ददर्श
ज्योत्स्नां भ्राजच्छशधरभुवं शारदीपूर्णिमीयाम् ॥ २

तामाश्लिष्य प्रियविरहिणी सा मनाग् भूरि शक्तिं
कर्तुं प्रीतीः कुवलयवनस्योच्चले सा तु दध्यौ ।
वर्वर्त्येषा तनुविरहिणोऽप्यर्त्तिं संपादयित्री
प्राणेशस्य प्रमदवसतेः किं पुनर्विप्रयोगे ? ॥ ३

अभ्यायाते जलदवियुते कार्तिके ज्योत्स्नया स्राक्
स्वप्रीत्यर्थं कुशलकलितं प्रापयिष्यत्युदन्तम् ।

तारामुक्ताफलपरिचितं हारमुत्कल्य तस्यै
सोच्चैः प्रीत्या प्रमुदितमनाः स्वागतं पृच्छति स्म ॥ ४

प्रातर्ह्यस्तं गतिरपि निशि स्थायीनीषत् क्व ? चन्द्र-
ज्योत्सनोदन्ताः सततबलिभिः प्रापणीया जनैः क्व ? ।
मोहादेवं विरहविधुरा प्रार्थयामास तां सा
रागाश्लिष्टाः सहजविकलाः साम्प्रतासाम्प्रते यत् ॥ ५

त्वामुत्पन्नां भुवननयनानन्दी नो वेद्मि चन्द्राद्-
गन्तुं पूज्यत्रिनयनशिरो दिक्षु गन्त्री यथेच्छम् ।
तस्माद् दैन्यं त्वयि गतवती मन्त्र[मुग्ध]भावेन मुक्ता
मद्भर्त्राऽऽसो यदुपकुरुतेऽलं यथाशक्ति दीनम् ॥ ६

हेतुः प्रीतेः प्रतिकुवलयं चन्द्रिके ! वर्त्तसे त्वं
मद्भर्तुस्तज्झटिति गदितुं दुःखिनीं मे प्रवृत्तिम् ।
सम्प्राप्ता या विरहजलधिं कर्मणा द्वारिका ते
प्राप्या चामीकरमयजिनप्रौढसौधाभिरामा ॥ ७

त्वामासीनां शशिमणिगृहे कामवत्यः प्रमोदात्
यास्यत्युच्चैः स्ववसतिमत प्राणनाथाः पदव्याम् ।
आयातायां त्वयि न कुरुते का निकाय्येषु यानं
यान् पानस्यादहमिव कदाप्याश्रिता विप्रलम्भैः ॥ ८

सौख्यस्पर्शो भवति पवनः प्रेरणाकाम्यया त्वा-
माशीर्वादं दिशति वचसा तेऽनुकूलश्चकोरः ।
पारावारः प्रकटलहरीनिर्गतैर्बिन्दुवृन्दैः
प्रीत्या वर्धापनमतितमा ते करिष्यत्यवश्यम् ॥ ९

नित्यं स्वान्ते निजमतसखी भूरिचिन्तां वहन्ती
मत्प्राणेशः कजमृदुमनाः सन्मुखं द्रक्ष्यति त्वाम् ।
कारुण्यार्द्रा विपदुपगतान् सन्मुखीनं हि दृष्ट्वा
यान्ति प्रीत्याः परतनुमतश्चोपकर्तुं समर्थाः ॥ १०

मोदाधिक्यं दृशि जनयितुं दर्शनं यत्प्रभूष्णु
प्रेक्ष्यं प्रेक्ष्यं तदखिलमहासम्मदार्तेर्निदानम् ।
तारास्तारास्तरुणकिरणाः प्राप्स्यसि त्वं सहायी-
भूताभूतापगततिमिराभीशुमुद्यानयाताः ॥ ११

आपृच्छ्या स्वं प्रियमुपपुरं दृश्यमानं त्वमेतद्
याहि क्षिप्रं सखि ! सह मया प्रेमपात्रीकृतात्मा ।
वार्त्तामेषा कुशलकथिकामानयिष्यत्यवश्यं
यत्त्वां पश्यत्यतिशुभदृशा प्रत्ययादित्यवेक्ष्याम् ॥ १२

अध्वानं तं श्रवणविषयं त्वं कुरुष्वालिमत्तः
पूर्वं सर्वं तदनु शृणु मद्वाचिकामादरेण ।
यत्राऽजिह्म तव जिगमिषा विद्यते तस्य हर्म्ये
क्षेपं क्षेपं श्रममविकलं विग्रहे विग्रहेच्छे ॥ १३

हैमः पातः किमिति भवतीत्युन्मुखीभिर्वशाभि-
र्भीतं भीतं चपलनयनैः प्रेक्षितो मुग्धधीभिः ।
एतस्मात् त्वं प्रकुरु गमनायास्पदादुद्यमं द्राग्
स्नेहाधिक्याद् भवति हि यतः कार्यसिद्धिः समग्रा ॥ १४

एतत्खण्डः स्फुटति समुदा कैरविण्याः प्रतीच्यां
त्वय्याबद्धस्वकविकचता सिद्धिसौगन्ध्यशालि ।

धत्ते यत्त्वां विरहवशतो म्लानिमात्मीयकाये
जात्यस्त्रीणां वपुरिव मनाक् सौवभर्तुर्वियोगे ॥ १५

ध्वान्तध्वंसस्तव निशि वशो दम्पतिभ्यामितीष्ट-
स्मेरश्चि(श्री?)भिनर्यननिगमैः प्रेक्ष्यमाणा मिथस्त्वम् ।
श्रित्वा किञ्चिद् भवनमनयोर्नित्यसम्पृक्तयोः स्वात्
पुण्यात्पश्चात्प्रभवजवतः पश्चिमायाः पदव्याम् ॥ १६

प्रासादस्त्वाँ प्रमुदितहृदं मातृमातुः स्वमूर्ध्ना
प्रेमस्थानाँ महिमकलितां धीरयिष्यत्यतीव ।
यत् पूज्यः स्याद् गिरीशचरणस्त्रस्तरेणोत्करोऽपी
शानेन स्वे शिरसि निहिता या पुनः किं न सा स्यात् ? ॥१७

आतिथ्यं ते द्रुतजिगमिषोऽसौ करिष्यत्यवश्यं
संसर्पन्त्याः सकलहरिता पुष्कलप्रीतिहेतोः ।
स्मेरीभूतं श्वमपि जनयोस्तद्गतकैरविण्याः
कक्षं प्रीतिः सुखकृतिपरा स्यान्मिथो ह्युत्तमानाम् ॥ १८

तुङ्गं शृङ्गं त्वयि शुचिरुचौ संश्रितायां विभूषा
दृश्या देव ! व्रजवनितया लप्स्यतेऽसौ गरीयान् ।
बिभ्रत् कान्तिहृतवसुमयीमाश्रिता मर्त्यवृक्षं
कल्याणादेः शिखरमिव दृग्दर्शनीयस्वरूपम् ॥ १९

आश्रित्यैनं द्रुतगतिरहोरात्रमेव त्वमस्मा-
दग्रे तीर्ण्णप्रचुरसरणिर्गोमतीं द्रक्ष्यसीक्ष्याम् ।
स्नेहं भर्त्रा सह कृतवतीं नित्यमामुष्मिकायात्
पौलोमीं वा त्रिदशपतिना भूरि भूरिप्रभाजा ॥ २०

भर्तुस्तस्यास्तव च जनकाद्धारमादाय गच्छे-
र्मुक्तायुक्तं न तु मम विभोः प्राभृतीकर्तुकामा ।
यस्माद् भूयः समयमिलितं स्वामिनं रिक्तपाणि-
र्न प्रेक्षेत स्वकबहुरतेः कामुकः शास्त्रदक्षः ॥ २१

श्यामादैर्घ्य विरहशिथिलीभूतकेयूरवत्याः
स्वामिंस्तस्यास्तनु वपुरभूदन्नपानारुचिश्च ।
प्रोच्चैस्तापो वपुषि शशिनो दीधितीभ्यः प्रभूतः
सौरभ्येण भ्रमरकृतमुच्चन्दनं वह्निकल्पम् ॥ २२

चिन्तापात्री विगलितसुखाज्ज्वालितात्मीयकाया
निःश्वासौघैर्विधुतशयना त्वद्वियोगेन सा भूत् ।
सख्या सादूर्धं ललनविषये निर्मितान्यूनमौना
बाष्पाम्भोभिः कृषिकजनवत् सिक्तवल्कैकवस्त्रा(प्रा) ॥ २३

सम्प्राप्य त्वं तमितिकथया प्रौढसौख्यस्य हेतुं
मच्चित्तस्य प्रियसखि ! मयि प्रास्तरागप्रवृत्तिम् ।
तस्मिन्नेव ध्रुवधृतधृतौ तत्करस्पर्श मिच्छौ
त्यक्तेच्छायामपरजगती स्वामिनीष्ठप्रभेऽपि ॥ २४

सन्देशीयैरिति सुवचनैर्यस्य नीतं न रागं
राजीमत्या हृदयममलाम्भोजसोमालवृत्ति ।
कारुण्यार्द्रं प्रकृतिसुभगं स्निग्धताश्लिष्टमिष्टं
गाम्भीर्येण व्यपगततमश्चक्रवालप्रवेशम् ॥ २५

पू.मु.श्री अमरहर्षगणिविरचितम्

## २३. ॥ श्रीनेमिनाथस्तवनम् ॥

विमलकीर्तिवधूकुलमन्दिरं, हृदयनिश्चलताजितमन्दरम् ।
वरयशोहरिवंशविभूषणं,
नमत नेमिजिनं गतदूषणम् ॥ (द्रुतविलम्बित) १

रासकः-

श्रीयादवकुलकमलविरोचन !, विषयमहीरुहदाहविरोचन ! ।
लोचनसुखकरशरीर तु जय, जय लोचनसुखकरशरीर ॥ २

मङ्गलपादपसेचनजीवन !, सूदितसाधुजनानघजीवन ! ।
जीवनमण्डलपाल तु जय जय जीवनमण्डलपाल ॥ ३

उपशमविनयविवेकनिकेतन, सुरपतिनतपद शङ्खसुकेतन ।
केतनसाधनधीर तु जय जय केतनसाधनधीर ॥ ४

स्वचरणभासितश्रीजिनशासन, भविकजनावलिहितकरशासन ।
शासनपरनरतार तु जय जय शासनपरनरतार ॥ ५

सूरीपुरावनिवशाहृदि सारहारं,
पुण्याम्बुना विहितकर्ममलापहारम् ।
पापाग्नितापितजगद्वनमेघधारं,
देवं नवीमि मदचौरवधासिधारम् ॥ (वसन्ततिलका) ६

काव्यम् : -

कुमतिलताततिपाटननेमिं, नेमिं नौमि जिनेशं रे ।
पूरितसेवकमानसकामं, कामं प्रणतं जिनेशं रे ॥ ७

सकलनरामरहितकरवाचं, वाचंयमनेतारं रे ।
भुवनत्रयतारणपरमोहं, मोहतिमिरसवितारं रे ॥ ८

भुवनवंशकर ! मन्मथशङ्कर ! शङ्कर ! शिवकर ! नेमे ! रे ।
विश्रुतशीलदयादमतपनय !, व्यपनय मरजननेमे रे ॥ ९

निर्मितपुण्यपरायणजनशिव !, शिवकैरवसितभानो ! रे ।
नन्द चिरं जिन ! विनतनरामर !, मरकतसमतनुभानो ! रे ॥१०

श्रीमत्समुद्रविजयाङ्गजनेमिनाथं,
वन्दे दयारसकुलीनसुसिन्धुनाथम् ।
वाणीविलासगुणरञ्जितभूमिनाथं,
संसारसिन्धुवहनं जगदेकनाथम् ॥ (वसन्ततिलका) ११

काव्यम् : - अढिआः
शिवतरुणीहृदि हार कृतदुःकृतसंहार ।
सारमुमुक्षुयते नतनरदेवपते रे जय जय नतनरदेवपते रे ॥१२

केवलपिकसहकार, हृदये हितसुखकार ।
चारुदयालुमते नाशितजनकुमते रे
जय जय नाशितजनकुमते रे ॥ १३

कलिमलहरणासार, निरुपमकरुणासार ।
सारमरालगते दर्शितसिद्धिगते रे
जय जय दर्शितसिद्धिगते रे ॥ १४

उज्झितमान समान, विश्वसुरद्रुसमान ।
मानवमुर्ध्वगते सूक्तभवान्तगते रे
जय जय सूक्तभवान्तगते रे ॥ १५

राजीमतीपतिमपूर्वगुणालिगेहं,
लोकत्रयीनयनसंमददायिदेहम् ।
शान्तारितोत्तमजनोच्चलचिन्तितेहं
नेमीस्वरं विमलभक्तिभृतो नुवेऽहम् ॥ (वसन्ततिलका) १६

फाग :
जिन ! जननत ! नरमोदक ! मोद–कराङ्गरुचे ! ।
जय वरशिवद ! विशारद ! शारदचन्द्रशुचे ! ॥ १७

जय जिन ! त्रिभुवनमोहन ! मोहनदीशतरी ।
वाञ्छितदानसुराऽगमरागमहीजकरी ॥ १८

निर्मितनित्यतपाऽवन ! पावन ! साधुयते ! ।
जीव चिरं यदुनन्दन ! नन्दननिपुणमते ! ॥ १९

स्थिर–चरजीवकृपापर ! पापरजौघहरे ! ।
त्वमसि विशुद्धशमाऽनघ ! मानघनेभहरे ! ॥ २०

श्रीनन्दनस्मयनिवारणनीलकण्ठं,
कोपानिलाशनविनाशननीलकण्ठम् ।
भव्यावलीहृदयहर्षकरोपकण्ठं,
नेमिं नमामि कलकण्ठसरूपकण्ठम् ॥ (वसन्ततिलका) २१

काव्यम् : त्रिपदी :
सुधामुधाकरवाणी नतहरीन्द्राणी रे ।
भीतन्तुकृपाणी रे, त्वमसि जिनाऽमलप्राणी रे ॥ २२

महानन्दसुखकारी सुकृताधिकारी रे ।
कषायापकारी रे, जिन ! नन्द जगदुपकारी रे ॥ २३

मुदा नतनर-नारी महागुणधारी रे ।
सकलविचारी रे, जय बालब्रह्मचारी रे ॥ २४

जयेनाऽघपरिहारी व्यापदपहारी रे ।
अनियतविहारी रे, प्रमुदितागमव्यवहारी रे ॥ २५

इति परमभक्तिभरेण मयका यः स्तुतो जिननायकः,
सकलमङ्गलकमलकाननबोधने ग्रहनायकः ।
श्रीविजयदानप्रधानतरधीरमरहर्षविधायकः,
श्रीनेमिनामा क्षेमधामा भवतु मे सुखदायकः ॥ (हरिगीतः) २६

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## २४. ॥ पञ्चम्यां श्रीनेमिदेवस्तोत्रम् ॥

श्रीसमुद्रविजयान्वयोदयोर्वीधरोपरिवरासनोन्नतिम् ।
लोकलोचनचकोरकौमुदीं नौमि नेमिजिनमुन्मना मुदा ॥ १
(रथोद्धता)

पावकं तावकं दर्शनं दर्शना-
नन्दकन्दं सदा सम्पदां सन्निधिम् ।
वीक्ष्य नेमीश भव्या भवन्ति प्रभा-
वैभवाभोगसद्भोगभाग्याद्भुताः ॥ (स्रग्विणी) २

पूर्वधन्यादिपुण्यप्रसर्पद्भव-
श्रेणिषु ज्ञानचारित्रसद्दर्शनम् ।
पालितं लालितं येन शुद्धं त्रिधा
संस्तुवे नेमितीर्थेश्वरं तं विभुम् ॥ (स्रग्विणी) ३

सर्वे भावा यस्य साक्षात् प्रभूताः
श्रीकैवल्यालोकनेनावदाताः ।
स्याद्वादात्ते वाच्यरूपाः सुधीनां
वन्दे भक्तिव्यक्तितस्तं जिनेशम् ॥ (शालिनी) ४

पञ्चम्याद्या वासरा यस्य विश्वे
कल्याणश्रीसिद्धिदा बुद्धिभाजाम् ।
वर्त्तन्ते ये सिद्धनामा रसोऽत्र
प्रोज्जागर्त्ति श्रीजिनः स्तात्स सिद्ध्यै ॥ (शालिनी) ५

विश्वाङ्गिसङ्गिकरुणारसशुद्धधर्मं
साभाव्यसत्यपशुवाटकभावनाभिः ।
वैराग्यरङ्गरसतः सरसां तपस्यां
जग्राह यः शिवपदं स जिनः प्रदेयात् ॥ (वसन्ततिलका) ६

प्राज्यं महाराज्यमपास्य शस्यसंवेगरङ्गेण महातपांसि ।
तीर्थात्मके रैवतके चकार चिराय यस्तत्सुखदः स सार्वः ॥७
(उपजाति)

अनन्तवीर्यत्वपदं यथातथं चकार यः स्वर्गिपतिप्रशंसने ।
अत्रागतैर्दैववरैः सहाजिभिर्जये कृते नेमिजिनः स सम्पदे ॥८
(उपजाति)

शैशवेऽपि प्रभुर्यः सुसत्यं दधौ सत्परीक्षाक्षमत्वं सुराणां हृदि ।
सन्ततानन्तवीर्यप्रशंसाविधौ
वज्रिणोक्ते मुदा तं स्तुमः श्रीजिनम् ॥ (स्रग्विणी)९

लक्षसङ्ख्याः क्षितीशाः क्षणाद् दुर्जया
जिग्यिरे दोर्भुजैकाकिनाऽप्युत्कटाः ।
युद्धमध्ये हरेः सैन्यवर्गे जरा-
व्याहते येन नेमिः स जीयाज्जयी ॥ (स्रग्विणी) १०

चरणयोगविजृम्भणविस्फुरत्-
करणशुद्धिविशोधितकार्मणम् ।
करणकोमलकान्तिकलोज्ज्वलं
विवृजिनं सुजिनश्रियमाश्रये ॥ (द्रुतविलम्बित) ११

नयननिर्जितपार्वणकौमुदीरमणमण्डलभासनकौशलम् ।
वचनसञ्चितचारुसुधारसं नमत नेमिजनं भविका मुदा ॥ १२
(द्रुतविलम्बित)

यदीयः पदद्वैतसेवाप्रपञ्चः
कलाकोटिसण्टङ्कनिष्टङ्किताङ्गान् ।
तनोत्यङ्गिनः सर्वसम्पन्मयश्री-
जुषः सौख्यपोषप्रदः स्तात्स सार्वः ॥ (भुजङ्गप्रयात) १३

गुणश्रेणिपूर्णं वरेण्यं यशोभि-
र्यदीयं श्रियां भासनं शासनं सत् ।
अधृष्यं प्रवादैः परैः प्राज्ञसेव्यं
सदा दीप्यते तं भजे नेमिदेवम् ॥ (भुजङ्गप्रयात) १४

प्रणत कामितकल्पतरून्नतिं विशदकीर्तिपवित्रितविष्टपम् ।
सरसकोमलपादपयोरुहं श्रयत नेमिजिनं विजयाकरम् ॥ १५
(द्रुतविलम्बित)

एवं भक्तिविशेषपोषसजुषा योगेन पूतात्मना,
नीतः संस्तुतिसत्पथं वितनु मे श्रीनेमिनाम्ना जिन ! ।
सत्यानन्दनिधानहर्षविनयश्रीसूरिहाभीष्टदं,
नित्यं बोधिधियं विशुद्धविधिना श्रीधर्महंसप्रभाम् ॥ १६
(शार्दूलविक्रीडित)

पू.मु. श्री समयसुन्दरगणिविरचितम्

नानाविधकाव्यजातिमयम्

## २५. ॥ श्रीनेमिनाथ- स्तवनम् ॥

........................ वारं स सायं वरं ।
सज्जो नंदिन वायरं पणमिमो हे देव ! सम्मं तुमं ॥ ७

नेमिनाहं सया वंदे, वरायमपयासयं ।
सायरंतरगंभीरं, भयवं स दिवायरं ॥ (अनुष्टुप्) ८

भक्त्या जे ... हं जरागण मदानंदादयध्वंसकं
लक्ष्मीदीप्रतनुं दयागुणभुवं तातां सतां दे वरम् ।
कृष्णस्फीतरुचिं नरा नमत भो जीवामतीति क्षिपं
त्यागश्रेष्ठयसोरसं कृतनतिं नेमिं मुदा त्रायक ॥ (शा.वि.) ९

भजेहं जगदानन्द सकलप्रभुतावरम् ।
कृतराजीमतीत्यागं श्रेयः संततिदायकम् ॥ (अनुष्टुप्) १०

पदकजनत सदमरशरण वरकमलवदन वरकरचरण ।
शमदमधर नरदरहरण जय जलजधरणमरकरकरण ॥ ११

श्रीसर्वज्ञं प्रोद्यत्प्रज्ञं, मोक्षावासं दत्तोल्लासम् ।
भव्याधारं रम्याकारं, वन्दे नित्यं नष्टासत्यं ॥(विद्युन्माला)१२

प्रोत्सर्प्पद्‌गुणपुष्पपुञ्जकलितः कृष्णच्छविः सर्वदा
मर्त्यानां शिवसौख्यवंछितफलं सद्‌बाहुशाखावरः ।
दद्यादद्य दरिद्रताभरहरः सद्धर्मपत्राकरः
श्रीमद्रैवतमेरुमण्डनमसौ श्रीनेमिकल्पद्रुमः ॥ (शा.वि.) १३

विविधवरकाव्यभेदैः, स्तुत एवं सकलचन्द्रबिम्बमुखः ।
प्रणतेन्द्रसमयसुन्दर गुणविततिर्नेमितीर्थेशः ॥ (आर्या) १४

पू.मु.श्री गुणनन्दीविजयविरचितम्

श्लोकान्तमालायमकमयम्

## २६. ॥ श्रीनेमिजिनस्तवनम् ॥

(द्रुतविलम्बित)

सकलकालकलाकलनाचणश्चपलपञ्चखदान्ति परायणः ।
विषमचापसमापशिवायति-
र्जयति नेमिजिनाधिपतिश्चरिम् ॥ १

चरणचारुरमापरमावधिम् विधुसुधोज्वलसद्‌गुणसेवधिम् ।
जिनमहं यदुवंशवतंसकं हृदि वहामि महाकरपल्लवम् ॥ २

लवणिमाललिताङ्गलताजुषो, भगवतश्चरणाम्बुजपूजया ।
वयमघं दलयेम समन्ततो, ग्रहमणेः प्रभयेव तमोघनम् ॥ ३

घनघनाघनमण्डलनिर्मलीकृततमालदलालिकलच्छिविः ।
शुभगतागुणशालिमतल्लिका, सुमनसे जिनपो मम रोचताम् ॥४

चतुरिमैकनिधेर्भवतः पुनः, कटकलङ्ककलापविवर्ज्जितम् ।
यदुकुलं विमलं शुशुभेऽधिकं, ध्रुवमिदं हि महापुरुषोचितम् ॥५

रुचितचन्दनचम्पकमालिकाकरनरामरपूजितपाद ! ते ।
शरणमस्तु समस्तसुखावहं, पदयुगं भवसंयुगगञ्जनम् ॥ ६

जनमनोनयनामृतसोदरे, दरहरे हरिणा स्वयमाऽऽश्रिते ।
मम मनो रमतां त्वयि सर्वदाऽप्यलियुवेव सरोरुहिणीरसे ॥७

रसिकमागधिकैरिव पण्डितैर्जयजयारवडिण्डिममण्डितैः ।
नरसुरेन्द्रगणैरविखण्डितं, कृतगुणस्तुतिपाठजया विभो ! ॥ ८

विभववृद्धि-समृद्धिसमागमः सममभीष्टतमैः सहसङ्गमः ।
सुगतिलाभसुखं च भवान्तरे,
भवति देव ! सतां भवदङ्घ्रिनाम् ॥ ९

चिनु धियं तनु दुर्मतितानवं दिश विवेकगुणेन समं शिवम् ।
कुरु तथा जिनशासनवासनं, विलयमेति यथा भवसङ्कटम् ॥१०

कटरि ! ते मुखसुन्दरिमागुणः कटरि ! ते प्रमदोदयिदायिता ।
कटरि ! ते परसौख्यविधायिता,
मम... हस्तभवान भवो गतिः ॥ ११

गतिरघो न भवे भविता क्वचित्, न च कुकर्मकदाधिविडम्बना।
तव जिनेन्द्र ! गुणस्तवकारिणां,
सुखमयः समयश्च सदा भवेत् ॥ १२

भविकलोकसुकेकिकदम्बके, जलधरायितरूपनिरीक्षणः ।
क्षणविखण्डितकामपरभवो, वसतु मे हृदये भगवान् नयैः ॥१३

नयनयोर्भविनां सुविकासिनां,
सफलतास्तु विभो ! भवदीक्षणात् ।

जिन ! तव स्तवने तु गिरोरसः,
सततमस्तु मम क्रम एषकः ॥ १४

इति मया गिरिनारविभूषणः, परिणुतो नयतो गुणनन्दये ।
मम ददातु स राजिमतीवरः, शिवफलं लघु नेमिजिनेश्वरः ॥१५

पू.मु.श्री राजसिंहविरचिता

महाकाव्यसप्तकपादपूर्तिरुपा

## २७. ॥ श्रीनेमिनाथस्तुतिः ॥

कश्चित्कान्ताऽविरह ! गुरुणाऽस्वाधिकारप्रमत् ! त !,
स्तोता पारं सदृगपि तवेयाद् गुणाब्धेर्जनोत्र ।
प्रान्त्योदन्वत्समधिकतरस्येति तुष्टाव मोदात्-
सुत्रामाऽयं दिशतु स शिवं श्रीशिवानन्दनो वः ॥ १
(मन्दाकान्ता)

वागर्थाऽविवसम्पृक्तौर्यस्य सज्ज्ञानशालिनः ।
श्रुता महोदयावाप्त्यै नूनं नेमिः श्रिये स वः ॥ (अनुष्टुप्) २

अस्त्युत्तर ! स्यां दिशि देव ! तात्मा-
द्यसारमंह्यब्जयुगे यथात्र ।
पुष्पन्धयीभूतशिरास्त्वदीये
तथा विधेयं विबुधार्च्यनेमे ! ॥ (उपजाति) ३

(वंशस्थ)

विशेषसुर्यः स्पृहणीयचन्द्रमाः,
सितं यशःपुञ्जमिवाधितप्रभुः ।

अलं पदोः कम्बु स एव मादृशे,
पदं शिवाजो वितरीतुमव्ययम् ॥ ४

श्रियः करूणामधिपस्य पालिनीं
गराडथालीं त्वकदंह्रिसेविनाम् ।
करोमि विज्ञप्तिमिमां कृताञ्जलिः
प्रसीद नेमे ! वितराऽक्षरं पदम् ॥ ५

निपीय यस्य क्षितिरक्षिणः कथा,
प्रसङ्गकल्पा भवभोगिभिः श्रियः ।
उपद्रुतानां भविकाद्रुतं गिरो,
ययुः सुधाशित्वमथंसनः स्यतु ॥ ६

श्रियः पतिः श्रीमति शाशितुं
जगत्त्रयस्यहेतुः किल रैवताचले ।
अनश्वरं मुक्तिमहन्महद्यकः,
सिषेध नेमिः स ददातु वः शुभम् ॥ ७

इति स्तुतः श्रीमुनिराजसिंह–
प्रसक्तितो यो रघुणा सुकाव्यैः ।
प्रसद्य सद्यो मयि सेवके प्रभु–
र्ददातु नेमिः स हि दीर्घदर्शिताम् ॥ (उपजाति) ८

पू.मु.श्री कीर्तिमेरुविरचितानि

## २८. ॥ श्रीनेमिनाथपदानि ॥

(राग मल्हार)

अविकलसकलकमलदलकोमलवदन-नयन-कर-पाय ।
श्रवणयुगल वररवि-शशिमंडलकुंडलकलितसुकाय ॥ १
(द्रुपद)

नेमि निहालीय [नेमि निहालीय] हिय[इ] धरिय आणंद ।
कीर्तिमेरुमुनि मुनिवर बोलइ सामी सामलवन्न ॥ २
(नेमि नि.)

जगगुरु गुरु जगरक्खण जगपहु जगबंधव जगजाण ।
हरि हर बंभ सुरासुर खेचर मानइं नरपति आण ॥ ३
(नेमि नि.)

अविगत अविचल अपरपरम पर अकल अमल अरिहंत ।
अतुल अगंजित अरिजणगंजण गजगतिगुण भगवंत ॥ ४
(नेमि नि.)

भोगपुरंदर परपुरुषोत्तम विनमतनागनरिंद ।
जनमनरंजन भवभयभंजन जयउ जयउ नेमिजिणंद ॥ ५
(नेमि नि.)

पू.मु.श्री कीर्तिमेरुविरचितम्

## २९. ॥ श्रीनेमिनाथस्तवम् ॥

विषमविषमसररणरणकारं, भविककमलकलदिनदिनकारं,
विदलितमोहविकारम् ।
प्रवचनरचनकवरगणकारं, भवभयभंजणचरणाकारं,
जनमतज्ञानाकारम् ॥ १

कलियुगकृतयुगकृतअवतारं, भविकजननजनवरधातारं,
त्रातारं जिनतारम् ।
जगतीयुवतीयुवभर्तारं, त्रिभुवनजीवनजवकर्तारं,
वंदे नेमिजितारम् ॥ (यु.) २

विकचकमलदललोचनसारं, गणधरवरलकवरकासारं,
निर्जितगुरुसंसारम् ।
निजभुजगञ्जितनरवरसारं, परमतभञ्जनधृतश्रीसारं,
प्रणमतसुरनरसारं ॥ ३

भूतलभूषणपरमाधारं, भवदरजलनिधिवरखंधारं,
वसुधावरवसुधारम् ।
अपरपरमपरपरमाचारं, गञ्जितविबुधवरवरसुविचारं,
सुरधृतकजसञ्चारम् ॥ ४

इत्येवं गिरिरैवतेन्द्रतिलकः श्रीनेमिनाथो मया,
नीलाम्भोजतमालतालसमभो भर्ता भुवो भूतिदः ।
सद्भाग्यैकनिकेतनं यतिनतं तं ये स्तुवन्ते सदा,
ते कीर्तिं समवाप्य मोक्षललनाक्रोडे लुठन्ते नराः ॥(शा.वि.)५

पू. मु.श्री आनन्दवल्लभविजयविरचितः

# ३०. ॥ गिरनारमण्डनश्रीनेमिजिनस्तवः ॥

वरौषधीभिस्सुतरां विराजितं,
वृक्षाभिरामं मुनिभिस्समाश्रितम् ।
मोक्षैकमार्गं गिरिमौलिभूतकं,
वन्दे सदाऽहं गिरनारभूधरम् ॥ (उपजाति) १

(अनुष्टुप्)

यौवने येन सन्त्यक्ता, नारी राजीमती शुभा ।
शिवश्रियां रतं नित्यं, वन्दे तं नेमिनाथकम् ॥ २

धृत्वा जीवदयां चित्ते, मोचयित्वा च प्राणिनः ।
उद्वाहे योगतः पश्चाद्, वन्दे तं नेमिनाथकम् ॥ ३

दीक्षाकालं सुराधीशो, ज्ञात्वा रैवतकाचले ।
स्वकृत्यमकरोद् यस्य, वन्दे तं नेमिनाथकम् ॥ ४

केवलोत्पत्तिवेलां वा, यस्य मत्वा सुराधिपः ।
अकरोत्स्वीयमर्थं च, वन्दे तं नेमिनाथकम् ॥ ५

मोक्षस्यावसरे यस्य, स्वामिनो भक्तितोऽकरोत् ।
हरिः स्वजन्मसाफल्यं, वन्दे तं नेमिनाथकम् ॥ ६

अम्बिकामूर्त्तिरम्यं वै, बहुकुण्डविराजितम् ।
देवैरपि सदा सेव्यं, वन्दे रैवतकाचलम् ॥ ७

अहो ! मे भाग्य-सम्पत्तिरहो ! मे पुण्यसञ्चयः ।
पश्यन्तु तज्जना भव्या, यज्जातं नेमिदर्शनम् ॥ ८

रस-द्विकाऽष्ट-सिध्यब्दे, चैत्रमासे सिते दले ।
राकायां कर्मवाट्यां च, वन्दितो नेमिनायकः ॥ ९

विदुषो रामचन्द्रस्य विनेयेन हितेच्छुना ।
आनन्दवल्लभेनासौ श्रीसङ्घेन समं मुदा ॥ १०

पू.मु.श्री हेमविजयविरचितम्

अष्टोत्तरशतकृत्वःसङ्कलितकमलशब्दगर्भितम्

## ३१. ॥ श्रीनेमिनाथस्तवनम् ॥

(वसन्ततिलका)

ध्यात्वा गिरामधिपतेर्हृदि शारदायाः,
पादद्वयं श्रुतमहोदधिपारदायाः ।
संस्तौमि सिद्धिवियदिन्दुमितैः स्फुटोक्त्या,
सन्दर्भितैः कमलजैर्जिननेमिमर्थैः ॥ १

सामोदमास्यकमलं जिन ! तावकीनं,
कल्याणवल्लिकमलं तदहं स्मरामि ।
यस्योक्तयो जगति सत्कमलाकरन्ति,
पुण्याम्बुजेषु घनमङ्कमलं हरन्त्यः ॥ २

जेतुं ध्वनिः पिकमलं भवति स्म तेषां,
गम्भीरताकमलराट्सदृशाशयानाम् ।
ये श्रीलताकमलमुक्प्रतिमं गुणौघं,
गायन्ति ते कमलभृत्कमनीयमीश ! ॥ ३

यद्धाम्नि तावकमलङ्घ्यवचःप्रपञ्च !,
पत्पांसुपेटकमलङ्कृतिरत्र जज्ञे ।
भाति स्म तत्र कमलं जलधाविवोच्चैः,
सर्वं प्रभूतकमलं सुधयाऽभिरामे ॥ ४

त्वन्नाम रामकमलं भवभीरुजासु,
ध्यायन्ति ये दलितशोकमलङ्गितोषम् ।
तेषां मुखं मुदितलोकमलञ्चकार,
श्रेयस्विनी कमलभूतनया नितान्तम् ॥ ५

श्रीसूतरःकमललक्ष्मभृदाऽऽधियुद्ध-
ध्वान्तप्रथाकमलमित्र ! पवित्रनेत्र ! ।
धर्मोर्मिमत्कमलराड् ! यदुवंशरत्न !,
कः प्राप्य नाऽङ्कमलसत् ? तव देव ! पुण्यम् ॥ ६

कीर्तेः कदम्बकमलं जितशारदीन-
राकामृगाङ्कमलपत् तव यः प्रमोदात् ।
तत्पादयोः कमलगद् द्युसदां किरीट-
रत्नौघक्लृप्तकमलभ्यतमप्रणामम् ॥ ७

सम्प्रीतशक्रकमलं गुणगीतमत्र,
शृण्वन्ति येऽङ्कमलयं भवदीयमस्यत् ।
ऐच्छत् सदङ्कमलसक्षितिरंह्रियुग्मं,
नन्तुं नखास्तकमलं जनता तदीयम् ॥ ८

भावारिभेकमलकापतिवन्द्य ! पाहि,
मां मुक्तियाचकमलञ्छितकाय ! स त्वम् ।
यद् वाग्भिरस्तकमलातनुभूविकारं,
स्त्रीमण्डलं दलितकल्कमलङ्कमासीत् ॥ ९

ध्यानं तवाऽनकमलक्ष्मधियां तदर्हं,
स्तान्मे सदम्बक ! मलत्वविमुक्तचित्त ! ।

दत्ते यदङ्कमलमुक्तपदं सदर्प-
कन्दर्पसर्पदलने कमलक्ष्मपुंसाम् ॥ १०

त्वां नीरजाङ्कमलसः कथमीश ! वेत्ति ?,
कर्मद्रुदाहकमलभ्यभवावतारम् ।
यं पेशलांशकमलं मनसि स्मरन्ति,
ज्ञानोर्मिमद्दकमलब्धिनिधिं मुनीन्द्राः ॥ ११

प्रोत्फुल्लपद्मकमलङ्कृत शत्रुसार्थ-
स्तं किं सुमोदिकमलक्ष्मणमुख्यमीश ! ।
स्फूर्जत्विवेकमलभत् सततं भवन्तं,
सुखस्वकमलक्ष्मिलताहिमं यः........... ॥ १२

रुपश्रियाऽस्तमकराङ्कमलाभमन्यु-
ध्वंसवृषाङ्कमलवच्छिदमेनमीडे ।
अप्युग्रधीर्यकमलञ्जदनादिमोह-
दस्युः प्रवेकमललाममना मनाग् न ॥ १३

निर्दर्प दर्पकमलक्षण ! लक्षणीयं,
त्वद्वक्त्रमत्र हरिणाङ्कमलक्षयद् यः ।
चित्रीरजाङ्कमलवप्रणयोर्मिरम्यं,
तस्याऽतिरेकमलडद् हृदयाब्धितोयम् ॥ १४

ये त्वामपातकमलन्त्यपरैरमर्त्यै-
र्यच्छद्भिरत्र कमलं न इदं वदन्तः ।
हृद्धाम्नि सिद्धयकमलन्त्यघमाविशत् ते,
साम्याम्बुमुक् कमललामललाममाऽऽशु ॥ १५

योऽङ्घ्री तवाऽन्तिकमलङ्घदपारपुण्यं,
सन्तुष्टलोकमलघुप्रतिभाप्रकाश ! ।
सम्यक् सुतर्कमलघुं लघु मार्गमर्त्ति-
कक्षैकपावकमलक्षयतै(दे)ष मुक्तेः ॥ १६

यो मङ्क्षु मस्तकमलक्षयदानतं त्वत्-
पत्पांसुभिर्निजमभीकमलङ्घमूर्च्छ ! ।
श्रेयःशशाङ्कम ! लताञ्जनपुष्पमञ्जो !,
सोऽप्राप्यपाटकमलङ्घदघौघपङ्कम् ॥ १७

मत्त्वाऽनलीकमलजत् तव शासनं यः,
पुण्ये पथि प्रियमशङ्कमलग्नदोषे ।
नन्तुं सुशूकमलति स्म तमद्रिभिन्मुद्-
वल्लीबलाहकमशोकमलब्धिमुक्तम् ॥ १८

श्लोकं सकृज्जितशशाङ्कमलब्धसौस्थ्यः,
संहृष्टकौशिकमलम्भत तावकं यः ।
राज्याभिषेकमलषत् त्रिजगत् तदीयं,
कर्तुं श्रियैकमलकैर्मृजयत् तदंह्री ॥ १९

हित्वाऽतिभावुकमलङ्घत तावकोक्त-
मन्यत्र बोधकमलध्वसुमत्प्रबर्हः ।
उद्वेगकारकमलम्बत लातुमोकः,
स्वं हृत् स नारकमलज्जविशामधीशः ॥ २०

सत्योक्तिमूकमलखत् पथि यत् तवोक्ते-
र्वृन्दं विशां कलितशङ्कमलम्बदृग् न ।

सञ्जाततर्कमललाममधोगतिस्त्री-
सङ्गेन साकमलसत् सुचिरं तदत्र ॥ २१

कन्दर्पकंसकमलाधिप ! निर्ममेऽत्र,
त्वद्वाक्प्रदीपकमलं स्वमनोगृहं यः ।
ज्ञानं सदाऽधिकमलञ्जयदस्य भूयो,
मोहच्छिदोत्सुकमलक्ष्मपथान्धभानुः ॥ २२

कीर्त्त्यस्तमौक्तिकमलक्तरसोपमान-
कामाङ्कुशं यदुकुलार्क ! मलप्रभावम् ।
रुग्ध्वस्तलोचकमलञ्छनमुक्तिनुन्न-
प्रत्यग्रपाकमलयोद्भवमंसलांसम् ॥ २३

विश्वैकनायकमलम्पटचित्तवृत्तिं,
श्रीमन्नपङ्कम ! लघुश्वसितप्रसारम् ।
स्निह्यत्कनीनिकमलर्कमिवेष्टदाने,
प्रह्वं स्तुवेऽणुकमलङ्गमहं भवन्तम् ॥ (यु.) २४

क्लेशाब्धितारकमलम्बयदुज्ज्वलं त्वद्-
वाक्यं कृपात्मकमलग्नमनाः पुमान् यः ।
सर्वो जनस्तकमलञ्जयदज्ञसञ्ज्ञं,
पापप्ररूपकमला(ल)र्कमिवाऽतिनिन्द्यम् ॥ २५

नित्यं तमेकमलघुं पथि पुण्यपूते,
प्रावीण्यपेटकमलङ्घ्यदात्मवक्त्रे ।
यो [देव !] तावकमलम्पयदात्मविन्ना
वाचां चयं कम ! लतोपमकायगन्ध ! ॥ २६

आस्तेऽकलङ्क ! मलयस्थिर ! यस्य चित्ते,
त्वन्नाम सत्कम ! लतान्तरिवाऽलिबालः ।
त्रैलोक्यदीपकमलम्भयताऽस्य सौख्यं,
वेश्मन्यशेषकमलाघववल्लिमूलम् ॥ २७

आसीन्नखाङ्कमलपानतमंह्रियुग्मं,
द्राक् ते सुरोकमलवश्रि यदीयमूर्ध्नि ।
विश्वाङ्गिनन्दकमलाभयदासुमुच्चैः,
स्वं शं स मौक्तिकमलं महनीयमूर्तिः ॥ २८

दामेव यः स्तवनमेतदुदारवर्णं,
स्फुर्जद्गुणश्रिकमलग्रथितं सदर्थम् ।
कण्ठस्थितं वितनुते तमुपैति सद्यः,
श्रीरिद्धहेमविजयप्रणयप्रकर्षा ॥ २९

पू.मु.श्री मणिविजयविरचिता

## ३२. ॥ श्रीनेमनाथजिनस्तुतिः ॥

(अनुष्टुप्)

नमः श्रीनेमिनाथाय, महानन्दाय तायिने ।
नमो देवाधिदेवाय, जगदानन्ददायिने ॥ १

विश्वलोकैकवर्याय, शिष्टाय ब्रह्मचारिणे ।
शरण्यजन्तुजातौघ-रागद्वेषमहारिणे ॥ २

चिदानन्दस्वरूपाय, महामन्मथवारिणे ।
विश्ववन्द्याय नाथाय, श्रीनेमिस्वामिने नमः ॥ ३

पू.मु.श्री पद्मसुन्दरविजयविरचितम्

षड्भाषानिबद्धम्

## ३३. ॥ श्रीनेमिजिनस्तवनम् ॥

(वंशस्थ)

संस्कृतम्

विजित्यदुर्वारमनङ्गविभ्रमं, विहाय बालामबलामतन्द्रितः ।
समापयन् ब्रह्मसमाधिसम्पदं,
शिवाय नेमिः शिवतातिरस्तु सः ॥ १

चलत्पताका चलपत्रपत्रवच्चलं विदित्वा किल सौख्यमक्षजम्।
अनन्तदृग्बोधमयि सुधामनि
स्फुरच्चिदानन्दसुखेऽवृतद्भवान् ॥ २

अयि ! क्व लीलाम्बुजधर्मवारणः श्रियश्चलच्चामरचारुचञ्चलाः।
क्व साम्यसाम्राज्यमहोदयो ध्रुवो
हृदीति सङ्ख्याय समाददे व्रतम् ॥ ३

स्वरूपतः सोहमिहास्मि तत् कथं, परोपतापं करवाणि तुल्यदृग्।
इति त्वदीयं करुणारुणं मनः,
समस्तसत्त्वेषु वधान्यवीव्यथत् ॥ ४

तमालनीलाऽम्बुजपुञ्जमञ्जुलं,
लसत्तडित्ताण्डवलोलकुण्डलम् ।
स्वरूपमाधाय करग्रहे सुरीदृशां निमेषत्वमपाहरद् भवान् ॥५

घटप्रतिभरस्तनीमखिलचन्द्रबिम्बाननां,
कनत्कनकचम्पकद्युतितनूमनुनश्रियम् ।
मरालगमनामनाकुलमनाः स वोऽव्याज्जिनो,
निभाल्य जरतीनिभां परिजहार राजीमतीम् ॥ (पृथ्वी) ६

वातव्याधूतनूतद्रुमगलितलताम्लानमन्दारमालां,
लीलामालापयन्ती विलपति विरहादीनवोपघ्ननिघ्ना ।
राजीमत्यङ्गनायाः किमिति हत विधे ! लेख एष व्यलेखि,
भावी योगे वियोगो ह्यकरुण !
करुणा त्वन्मनो नो रुणद्धि ॥ (स्रग्धरा) ७

प्राकृत :
किं ते भंते ! सिववरवधूसंगमेरंगमेलो,
जाहं वाहंबुधरनयणा रोयमाणा विसन्ना ।
चित्तं रत्तं तव गुणगुणे रुवलावण्णपुण्णे,
चत्ताऽऽसत्ता जइ जिण ! तए सुंदरो ते विवेओ ॥ ८
(मन्दाक्रान्ता)

किं वा लीलामराली नवघुसिणरसेणाणुलित्ता पुरा मे,
संभंतो रायहंसो रहचरणपियं मन्नमाणो विरत्तो ।
तम्हा तुम्हाण णाहामुहकमलसिरीदंसणे वंचियाऽहं,
एसो मे कम्मदोसो परिणयसमए जं न दिट्ठीहि दिट्ठो ॥ ९
(स्रग्धरा)

एसा चंपयमालिय व्व सुहया सिंगारभिंगारिया,
फुल्लिंदीवरलोयणा ससिमुही राईमई तं तुमं ।
मुत्तूणं जमदिट्ठि सिद्धिरमणिं पत्थेसि जुत्तं ण तं,
एवं णो खुहिओ वयंसभणिओ णिव्विण्णचित्तो जिणो ॥ १०
(शार्दूल.)

दाऊण दाणमणुवच्छरमत्थिएहिं,
आभोइऊण णियणिक्खमणस्स कालं ।
उज्जितसेलसिहरे गहिऊण दिक्खं,
कासी य छट्ठतवसा भयवं विहारं ॥ (वसन्ततिलका) ११

पव्वज्जमज्झवगया तुह पायमूले,
सा उग्गसेणतणया पइणिच्चभत्ता ।
तुम्हारिसाण दुलहं लहिऊण संगं,
किं सुद्धि-बुद्धिणिउणा विरमंति धन्ना ? ॥(वसन्ततिलका)१२

शौरसेनी :

चिंतेहि जो हिदयमंदरकंदरम्मि,
णाधस्स णाम हरिमुद्दरिदं महंदो ।
उच्चासिदूण भवकुंजरमुत्तमट्ठं,
साधेदि णिव्वुदिपदे रमदे सलीलं ॥ (वसन्ततिलका) १३

पणदसुरकरीडोदारमंदारदाम-
च्छविकिरणपरागुम्मीसिदं पादपोम्मं ।
णमध णमध णिच्चं भत्तसत्ताणताणं,
कधमध भविया भे अण्णधा भोदि भंदं ॥ (मालिनी) १४

गद-मदण-वियारऽण्णाण-हासादिछक्कं,
विघडिदपणविग्घं चत्तमिच्छत्तसंगं ।
जिद-अविरदिणिद्दा-रागदोसादिदोसं,
समरसरससिंधुं देवदेवं णमामि ॥ (मालिनी) १५

दव्वं अत्थि त्ति णत्थि त्ति य उभयमवत्तव्वमाहोसयं वा,
सच्चं णिच्चं अणिच्चं णय-गमबसदो णेगमेगं कथंवि ।
अत्थे धम्मा अणंदा इदिजिणभणिदो ते अणेगंदवादो,
एगंदो जत्थ मिच्छा तव वयणसुधासिंधुणीसिंदबिंदू ॥ १६
(स्रग्धरा)

(द्रुतविलम्बित)

मागधी:

तव मुदं कुणये हि अणेलिशं, णयमिधोमिलणेण विलाइदं ।
मम शदा शलणं चलणं च ते, नलशुलाशुलमोलिणमंशिदं ॥१७

यदिहगे यिणदंशणमुत्तमं सुदुलहं लहिऊण पमादवं ।
कधमणंदशुहोहपलंपलापलिणदंपदमस्स भविस्सिदि ॥ १८

पलमकालुणिए भयवं भवं, कुणदि हंदि कधं अवधीलणं ।
मम मणम्मि तुमं शमुवस्तिदे, अहह गज्जदि मोहमहाकली॥१९

चुलिकापैशाची:

हितपकं चलणेसु नियोजितं, तुह कुनक्कहने महा फालती ।
कलन मच्छतु ते अफिपंतने, इति सताचिरकंखतिमेतिसो ॥२०

तुव कुवकनंफोधिस्स तं न एति पुहस्पती,
कथमहमथो नातुं सक्को विसंथुलमंतथी ।
चलन-कमलं सेवे निच्चं तुम कलुनानिधी,
मम हलिकुलुत्तंसासेयं तुमा तु फविस्सति ॥ (हरिणी) २१

नवचलतपितानतेहकंती कुमततमोहलने सहस्सलस्सी ।
मतनमतखनालिकंथवाहो
चयतु सिवातनयो अरिट्ठनेमि ॥ (पुष्पिताग्रा) २२

अपभ्रंश:

पइं दिठिहिं जिणनाह, जांह न दिठि समुल्लसइ ।
तं पुण गुरुकम्माह, दोसु न तांह कुबुद्धि यांह ॥ (गाहा) २३

जे जिणवर तुह आण पालहिं तहिं संजमु सहलु ।
जं विणु आण-विनाण तं तु सखंडण जिम्व अहलु ॥ २४

अन्नारिसु तुहमग्ग, अवराइ सुतवु आयरइ ।
सगड जेम्व धुरभग्गु, किम्व सथर पहि संचरइ ॥ २५

समसंस्कृतम् :
तरणिकर-तरुणतर-विमलकेवलधरं,
धरणिधरसारसमसमयगुणसुंदरं ।
देवमघहरणमहमसदसम्मदपदं,
भीमभवभय भिदाकरणमभिभवनुदं ॥ (सुप्रभा) २६

विधुरभरदंतिदरदलनकंठीरवं,
तं भजे गतजरा-मरण दारुणभवं ।
तार तर हार हर हास गुणगणमयं,
सिद्धिरमणीरमणलीलालयं ॥ (यु.) २७

देव-गुरुरेव नहि देवमहिमोदयं,
भणति तव कोहमानंदकमलालयं ।
किंतु कलिकाल - मलहरणकारणमलं,
कामये चरणपरिचरणमिह मंगलं ॥ २८

षड्भाषाभिस्तवनमिह मे निर्म्मिमाणस्य जज्ञे,
पुण्यं तस्मात्तव नवपदं द्वंद्वराजीवराजी ।
चेतः सद्मन्यविरतमलं भासमाना समाना,
क्षेमामोदं दिशतु शिवपदानन्दमन्दारकन्दम् ॥ (मन्दाक्रान्ता) २९

ये त्वच्छासनमामनन्ति मनसि स्याद्वादमुद्राङ्कितं,
तैस्तत्वं निरटङ्किसङ्कटकुटीकोणायमानं परैः ।
तद्भक्ताः किल पद्मसुन्दरपदामोदप्रमोदास्पदं,
साम्राज्यं विलसन्तु सन्तु सततध्यानावधानास्त्वयि ॥ ३०
(शार्दूल.)

सङ्घपतिसचिवश्रीवस्तुपालविरचितम्

## ३४. ॥ श्रीरैवतमण्डननेमिजिनस्तोत्रम् ॥

(शार्दूलविक्रीडित)

श्रीचौलुक्यमहीमहेन्द्रसचिवः श्रीवस्तुपालः कवि-
र्जित्वा मोहनृपं विधाय विषयग्रामश्रियो वश्यताम् ।
अस्मिन् रैवतदैवतस्य भवने स्वात्मावबोधोद्गम-
प्रोद्भूतैः पृथुभिर्मनोरथदलैर्बध्नाति मालामिमाम् ॥ १

स्वान्तं रैवतमौ[लि]रत्न ! विषयाऽरण्यान्तरे सञ्चर-
न्नीतं मोहमहोरगोग्रगरलोत्सेकेन मूर्च्छालताम् ।
सद्यः शान्तरसाऽमृतप्लवमयध्यानाऽवधानाऽञ्चितै-
रेभिः पुण्यमनोरथैर्गरहरैर्मन्त्रैरिवोज्जीव्यते ॥ २

स श्रीरैवतकावतंस ! भगवन् ! भावी कदा वासरः
सा वा यामवती स कश्चिदमृतापूर्त्तं मुहूर्त्तोऽथवा ।
यत्र त्वद् वदनेन्दुदीधितिसुधासारैर्भवेयुर्भव-
ग्रीष्मोष्मप्रसरं निरस्य विशदप्रीतिस्पृशो मे दृशः ॥ ३

मन्थित्वा निबिडान् प्रमादनिगडान् निर्भिद्य लोभार्गलां
कामादीन् विनिहत्य रैवतपते ! तान् यामिकान् जाग्रतः ।
एतस्माद् दुरपोहमोहतमसः संसारकारागृहा-
न्निर्गत्य त्वयि विश्वभास्वति कदा दास्ये सलास्ये दृशौ ? ॥४

मूर्च्छालः स्मरदन्दशूकदशनैर्दुवासनासै(शै)वलै-
रालीढः कषितः कषायकमठैर्मग्नश्च मोहाम्भसि ।
निर्गन्तास्मि कदा पदाम्बुजरजोमैत्रीं वरत्रां तव
प्राप्याऽलङ्कृत रैवताऽचल ! भवाऽऽवर्त्तान्धिकूपादितः ॥ ५

स्वामिन् ! रैवतकाद्रिशेखर ! दुराचाराऽध्वसञ्चारिणा-
मन्येषामसमानकल्मषमुखाऽऽलोकेन कल्माषिताः ।
त्वल्लावण्यसमृद्धिसिद्धिसरिति स्नानैकतानव्रताः
पावित्र्यं मम विश्वपावन ! कदा सम्भावयेयुर्दृशः ॥ ६

श्रीमन् ! रैवतकल्पपादप ! भवग्रीष्मोष्मसन्तापितं
दोषादर्शदुरीशदर्शनदवज्ज्वालाकरालं च मे ।
देव ! त्वन्मुखचन्द्रमण्डलमहःपीयूषपानोत्सवात्-
क्षीबानन्दमिदं भविष्यति कदा चक्षुश्चकोरद्वयम् ॥ ७

विद्धो व्याधिविरोधिभिः स्मरमहाचौरेण दूरीकृतः
सर्वस्वस्य (?) कषायकेशरिकुलव्यालोकनाद् व्याकुलः ।
यातस्तात ! भवाटवीं यदुकुलोत्तंस ! श्रितो रैवतं-
दुर्गं निर्गमये कदा तव पदा[दे]ऽभ्यर्णे भटे तद् भयम् ॥ ८

स्वामिन् ! रैवतकाद्रिकन्दरदरीकोणप्रणीतासनः
प्रत्याहारमनोहरं सुकुलयन् कल्लोललोलं मनः ।
त्वां चण्डांशुमरीचिमण्डलरुचं साक्षादिवाऽऽलोकयन्
सम्पद्येय कदाचिदात्म(मि)कपरानन्दोर्मिसंवर्मितः ॥ ९

मन्ये सर्वजनीनपीनमहिमा ! शैवेय ! निर्वेयता (निर्वेद ते ?)
दृष्टः क्वाऽपि भवान् भवार्णवकुले मग्नस्तथैवाऽस्मि यत् ।
तत्सम्प्रत्यपि धीर ! धारयसि मामुद्धर्त्तुमिच्छां कदा
तिर्यञ्चोऽप्यथवा कथं न भगवन् ! पूर्वं त्वयोज्जीविताः ॥ १०

(वसन्ततिलका)

स्वामिन् ! समुद्रविजयात्मज ! विश्वनाथ !
न प्रार्थयेऽन्यदिह किञ्च तव प्रसादात् ।

एते मनोरथमयास्तरवो मदीया-
स्त्वद्दर्शनाऽमृतरसैः फलिनो भवन्तु ॥ ११

(आर्या)

श्रीवीरधवलभूपति-सचिवः श्रीवस्तुपालसङ्घपतिः ।
हारं मनोरथमयं सहृदय-हृदयैकभूषणं चक्रे ॥ १२

गुर्जरेश्वरमहामात्यश्रीवस्तुपालविरचितः

## ३५. ॥ रैवतकाद्रिमण्डनश्रीनेमिजिनस्तवः ॥

(पृथ्वी)

जयत्यसमसंयमः शमितमन्मथप्रभावो,
भवोदधिमहातरिर्दुरितदावपाथोधरः ।
तपस्तपनपूर्वदिक्कलुषकर्मवल्लीगजः,
समुद्रविजयाङ्गजस्त्रिभुवनैकचूडामणिः ॥ १

अहङ्कृतिलतायुधं प्रमदमान्द्यसिद्धौषधं,
मदेन्धनधनञ्जयः स्मरकरीन्द्रकण्ठीरवः ।
स्पृहारजनिवासरः प्रथितपङ्कतीव्रातपः,
समुद्रविजयात्मजः स्फुरतु मानसे मेऽनिशम् ॥ २

मेरुर्मे रुचिमातनोति न मुधा मानी हिमानीगिरिः
कैलासस्तु न वस्तुतः स्तुतिपदं वन्ध्यः स विन्ध्याचलः ।
श्लाघ्यो रैवत एव केवलमयं शृङ्गाणि शृङ्गारय-
त्युच्चैर्यस्य जगत्त्रयस्तुतिपदः श्रीनेमिकल्पद्रुमः ॥(शा.वि.)३

संसारार्तितपोपतापशमनश्रद्धालवः ! किं मुधा,
राग-द्वेषदवोल्मुकैर्बत ! बुधाः ! सेव्यान्तरैः सेवितैः ? ।

आजन्मोपशमामृतैकसरसः श्रीरिष्टनेमिप्रभो-
र्निर्वृत्यौपयिकं पदाम्बुजयुगं धत्त प्रसक्तं हृदि ॥ (शा.वि.)४

यस्यानीकवधूभिरेव विजिताः स्व- र्भू-र्भुवःस्वामिनो,
मौलौ शासनमुद्वहन्ति भुवने देवोऽयमेकः स्मरः ।
सोऽप्याजन्मजितः करोति न करे जैत्रं धनुर्यं प्रति,
प्रीतिं रैवतदैवतं वितनुतां देवाधिदेवः स वः ॥ (शा.वि.)५

येषां मूर्तिरसौ तवेश ! परमानन्दैकनिस्यन्दिनी,
ध्यानावेशवशंवदा स्मृतिपथे शश्वत् पुनीतेतमाम् ।
तेषां सम्मदवारिपूरितदृशां शैवेय ! नैवेयम -
प्याधत्ते मनसश्चमत्कृतिसुखं सा सिद्धिसीमन्तिनी ॥(शा.वि.)६

साम्राज्यं चतुरर्णवीनिवसनक्षोणीशमौलिस्खल-
त्पादाब्जं न सुरा-ऽसुरेन्द्रमुकुटस्पृष्टांह्रिपीठं च न ।
सिद्धिं शाश्वतसौख्यसङ्गसुभगां नाभ्यर्थये किन्तु मे,
श्रीशैवेय ! तवेयमस्तु चरणाम्भोजेषु भक्तिर्भृशम् ॥(शा.वि.)७

नेपथ्यैरतिथीभवत्पृथुतरापथ्यैरतथ्यप्रथै-
रुद्यद्वैद्युतडम्बरैः किमपरैरेकैव भूयान्मम ।
आश्लेषस्पृहयालुमुक्तियुवतिप्रीतिप्रियम्भावुका,
श्रीमन्नेमिजिनेशितुः स्तुतिरियं ग्रैवेयकं शाश्वतम् ॥(शा.वि.)८

इत्थं श्रीवस्तुपालः सुकृतसुरतरोरालवालस्त्रिलोकी-
स्वामिन् नेमे ! त्वदीयक्रमकमलरजः पुञ्जपुण्यैकभालः ।
सङ्घाधीशश्चुलुक्यक्षितिपतिसचिवः शारदाधर्मसूनु-
र्विज्ञप्तिं ते विधत्ते प्रथय मम सदा दर्शनेन प्रसादम् ॥ ९
(स्रग्धरा)

श्रीसङ्घभर्तृसचिवेश्वरवस्तुपाल-
क्लृप्तेन नेमिनमनेन किलाष्टकेन ।
यः स्तौति तस्य कमलामविलम्बमम्बा-
देवी तनोत्यतनु सन्तनुते च तेजः ॥ (वसन्ततिलका)१०

सुश्रावकचतुर्भुजविरचिता

## ३६. ॥ श्रीनेमिजिनस्तुतिः ॥

जय जय यादववंशावतंसजगत्पते !,
समुद्रविजयनरराजशिवासुतसन्मते ! ।
जय जय जनताजननजलधितारणतरे !,
सावभावयोगीन्द्रसहोलवजितहरे ! ॥ १

जय जय जनदुर्वारमारमदगिरिपवे !,
सजलजलदशितिवर्णसवर्णतनुच्छवे ! ।
जय जय जगति प्रमदकुमुदहिमदीधिते !,
करुणारसकूपारविमोचितपशुसिते ! ॥ २

जय जय स त्वमुदूटिधियाऽऽतुरता सती,
त्यक्ता येन विरागवता राजीमती ।
जय जय निर्गतदोषकोषनिजगुणतते !,
सकलसुरासुरराजरचितसार्चानते ! ॥ ३

जय जय शमदमलीनपीनसमतारते !
भुवनविभूषणवर्णवर्णवारिजगते ! ।
जय जय कुमतिकुवाटनिशाटनिशान्तकृद् !,
वाग्द्युतिदर्शितभुवनभावपथपीथवद् ॥ ४

जय जय दीक्षान्यक्षवृत्तिनिर्वृतिवृते !,
कृतरैवतगिरिराजतीर्थताविश्रुते ! ।
जय जय संश्रितसत्त्वसमीहितदायक !,
दुर्गतिदवलवनेमिनेमिजिननायक ! ॥ ५

सुदिनमहो मम चाऽद्य तथा सुदशा धव !,
दर्शनमिह यदभूत्किल मेऽप्यघिनस्तव ।
सिद्धं चिन्तितकार्यमार्य सफला जनि-
रजनिष्टचरीदमन्दभन्दकन्दावनी ॥ ६

विश्वजनीन ! सदीनमिति निजदृक्सृतिं,
कथमथ मामवमान्य भजेर्यशसोन्नतिम् ।
त्वत्किङ्करमवगत्य सत्यसुखसावधि,
प्रतिजनि मे निजमेव देव ! दिश सन्निधिम् ॥ ७

भूरिजनो यदरक्षि भवान् निजसद्दृशा,
सम्प्रति मेऽप्यनुप्रेक्ष्य विभो ! भव नवयशाः ।
किं बहुयाचनयाऽथ नाथ ! तव पार्श्वतः,
स्वीयचरणशरणैकगतं कुरु मामवतः (मतः) ॥ ८

इति स्तुतः श्रीगिरिनारमण्डनः,
संसेव्यमानोऽम्बिकया निरन्तरम् ।
नेमीश्वरः स्तात् सततं सदङ्गिनां,
चतुर्गतिभ्रान्तिहरः शिवङ्करः ॥ (उपजाति) ९

(श्री कल्याण कर्तृका ?)

## ३७. ॥ श्रीनेमिनाथस्तुतिः ॥

(अनुष्टुप्)

श्री नेमिस्वामिनं नौमि जगदीश्वरमव्ययम् ।
अर्हन्तमरिहमाप्तमरोहन्तं निरञ्जनम् ॥ १

(उपजाति)

सद्भूतभक्त्या सकलैः सुरेन्द्रैः सदेववृन्दैः परिवन्दिताङ्घ्रिम् ।
जगद्धितोपायमपायमुक्त-मव्यक्तमाद्यं मुनिमेनमीडे ॥ २

मनोरथैर्नाथ ! परः सहस्रैः, समीहिताया भुवने दुरापा ।
साऽद्य त्वदीयाङ्घ्रिसरोजसेवा,
वाऽऽप्ये मयाऽहो मम भाग्ययोगः ॥ ३

किं कल्पवल्ली यदि वा त्रिलोक्या आनन्दसर्वस्वमियं सुधा वा।
मूर्तिस्तवाऽसौ वितनोति दृष्टमात्रैव मे विस्मयमेवमीश ॥ ४

मुहुर्मुहुर्वीक्षणतश्च मन्ये साक्षादसौ ते किल मुक्त्यवस्था ।
यामीक्षमाणाः शिवशर्ममग्नं
सन्तः स्वमत्रापि हि मन्वते यत् ॥ ५

त्वमेव शम्भुर्भुवनादिभेदी विभुः स्वयम्भूर्भवभीतिभेत्ता ।
वेत्ता च वक्ता च सतां हितानां
देव ! त्वमेवात्र परो न कश्चित् ॥ ६

विश्वत्रयी वत्सल ! वाञ्छितार्थप्रदेशने प्रत्यलमाप्तमेकम् ।
भीमे भवारण्यपथे भवन्तं, श्रये शरण्यं करुणाम्बुराशे ! ॥ ७

विष्वग् विषावेगवदुत्तरङ्गा मुहुर्मुहुर्मोहविमूर्छना मे ।
चैतन्यमन्यस्तिरयन्ति तात !
कुतो हताशोऽस्मि भवत्यपीशो ॥ ८

अनन्तसंसारपथाध्वनीनं हीनं गुणैर्मामत एव दीनम् ।
दयाम्बुधे ! देव ! दयार्हमेतं विलोकय स्वीयदृशैकवारम् ॥ ९

संसारकारागृहदुःस्थितस्य कर्माष्टकोद्यन्निगडान्वितस्य ।
दुष्टां दशां नाशय मे त्रिलोकी
राज ! प्रसाद्यास्य ! सुदीनवाचः ॥ १०

विश्वैकबन्धो ! विधिसेवकानां, मामोक्षलाभाभ्युदयप्रदेन ।
अनन्तवेत्तः भगवन् ! भवेयं
सना सनाथो [जिन !] देव देव ! ॥ ११

नीतोऽस्मि यैरद्य तवाङ्घ्रिपीठे पुनश्चयानि प्रतिभूप्रभाणि ।
त्वद्दर्शने मे जगदीश ! नेमे ! पुण्यानि तान्येव चिरं जयन्तु ॥१२

भाविन्यवश्यं त्वयि विश्वनाथे,
प्राप्तं (प्राप्ता) प्रभो ! मे प्रभुतात्मकृत्ये ।
कल्पद्रुमे सान्द्रफले न वै किं दरिद्रमुद्रा द्रुतमेति नाशम् ॥१३

अचिन्त्यचिन्तामणितो महीयो माहात्म्यभाजो भवतः प्रभावात्।
त्वद् भावसम्बन्धनिबन्धनं मे,
मनोरथाः सिद्धिमिमे श्रयन्तु ॥ १४

तव प्रसादाज्जगदीश ! नेमे ! कामं महामोहतमोऽपहारि ।
कल्याणमाला सदैव (मङ्गलं),
त्वत्पादसेवासुखमेव मेऽस्तु ॥ १५

## ३८. ॥ श्रीनेमिनाथचैत्यवन्दनम् ॥

(अनुष्टुप्)

ॐ नमो विश्वनाथाय, जन्मतो ब्रह्मचारिणे ।
कर्मवल्लीवनच्छेद-नेमयेऽरिष्टनेमये ॥ १

यदुवंशसमुद्रेन्दुः, कर्मकक्षहुताशनः ।
अरिष्टनेमिर्भगवान्, भूयाद्वोऽरिष्टनाशनः ॥ २

अनन्तपरमानन्द-पूर्णधामव्यवस्थितः ।
भवन्तं भवता साक्षी पश्यतीह जिनोखिल ॥ ३

स्तुवन्तस्तावकं बिम्ब-मन्यथा कथमीदृशं ।
प्रमोदातिशयश्चित्ते, जायते भुवनातिग ॥ ४

## ३९. ॥ श्रीनेमिनाथचैत्यवन्दनम् ॥

(उपजाति)

सच्छील संतर्जिततारकारिम्,
स्वरूपसंनिर्जीतसंवरारिं,
कन्दर्पमातङ्गविभेदभारी,
नमामि नित्यं जिननेमिनाथम् ॥ १

शङ्खाङ्किताङ्घ्रीं वरनीलकान्तिं,
स्वकीयवाण्याकृतलोकशान्तिं,
देवादिदेवं विहिताक्षदान्तिं,
नमामि नित्यं जिननेमिनाथम् ॥ २

मुक्तिप्रियाकण्ठवितानहारं,
यशः सदाराम सुसार सारं ।
संलब्ध संसारजलेशपारं,
नमामि नित्यं जिननेमिनाथम् ॥ ३

# ४०. ॥ श्रीनेमिजिनस्तवनम् ॥

(अनुष्टुप्)

लोकोत्तरचरित्रौघ ! उज्जयन्तावतंसक ! ।
विज्ञ ! विज्ञप्तिमेतां मे, श्रीमन्नेमेऽवधारय ॥ १

वाचस्पतिरपि स्तोतुं, नालं त्वां कल्पकोटिभिः ।
यत्त्वहं स्तोतुमिच्छुस्तज्जात्यन्धाऽपाङ्गवीक्षणम् ॥ २

तथापि श्रद्धया मुग्धः, स्तोष्येऽहं त्वत्प्रसत्तये ।
पित्रोः प्रीत्यै न किं बालस्याऽव्यक्तमपि जल्पितम् ? ॥ ३

सार्व ! सर्वात्मना सर्वे, ते गुणास्त्वां समाश्रिताः ।
परे परेषां देवत्वं, रोपयन्ति यदंशतः ॥ ४

अर्हत्वात् सर्वपूजानां, कर्मारिहननादपि ।
पुनर्भवाप्ररोहात् त्वमर्हन्नित्यार्हतैस्स्तुतः ॥ ५

मुनिनाथो महाबोधिस्त्रिकालज्ञो जितेन्द्रियः ।
बौद्धैर्बुद्ध इति ज्ञात्वा, त्वमेवाराध्यसे जिन ! ॥ ६

रजस्तमोविनिर्मुक्तो नित्यः सर्वग-चिन्मयः ।
निःक्रियः सुखभोक्ता च, साङ्ख्यः ख्यातः पुमान् भवान् ॥७

प्राज्ञैर्ज्ञेयो महाभ्यासात् परोपनिषदात्मकः ।
त्वं वेदाख्यो जेमनीयैर्धर्मजिज्ञासुभिर्मतः ॥ ८

सर्वंसहोप्यनाधारः पावकः सर्वतोमुखः ।
महाबलोऽसि चार्वाकैर्मन्यसे भूतमानिभिः ॥ ९

भवान्तकारी लोकेशः, परमेष्ठी चतुर्मुखः ।
अजिह्मो ब्रह्मवान् ब्रह्मा,ब्राह्मणैस्त्वं निषेव्यसे ॥ १०

दशार्हः पुण्डरीकाख्यो, हृषीकेशो यदूत्तमः ।
त्वमेव सेव्यसे देवः, विष्णुः परमवैष्णवैः ॥ ११

गणनाथोऽम्बिकाराध्यो, गिरीशः सुमहाव्रती ।
सेव्यसे त्वं शिवः शैवैः, कामं कामजयीश्वरः ॥ १२

जगच्चक्षुर्जगत्कर्मसाक्षी भास्वान् विभावसुः ।
सूर्यभक्तैस्त्वमेवेन !, पूज्यसे तेजसांनिधिः ॥ १३

सप्तरज्जुमिताभ्रोर्ध्वमलक्षाकारमाश्रितः ।
आराध्यसे लक्षभक्तैस्त्वं गोस्वामीतिवादिभिः ॥ १४

जिह्वाग्रे तव वाग्देवी, कमला लोचनाञ्चले ।
ग्रहा नवापि पादान्ते, किङ्कराश्च सुरासुराः ॥ १५

तत्त्ववृत्त्या तत्त्वमेव, देवलक्षणलक्षितः ।
सर्वदर्शनिभिर्मान्यो, नान्यो विश्वत्रये ततः ॥ १६

मृगराजः सिंह एव, सूर्य एव दिवाकरः ।
त्वमेव देवदेवोऽसि, नापरः परमेश्वरः ॥ १७

तप्तं जप्तं हुतं दत्तं, तेन सर्वं व्रतं कृतम् ।
येन त्वमेकचित्तेन, ध्यातः क्षणमपि प्रभो ! ॥ १८

ते धन्या वन्दनीयास्ते, तेषां जन्म फलेग्रहि ।
येषां मनोवचः कायैः, सेवाहेवाकिता त्वयि ॥ १९

अहं तु हन्त रागान्धो, ग्रस्तो मोहमहाऽहिना ।
क्रोधाद्यैर्बाधितो बाढं, कामं कामेन दामितः ॥ २०

अपास्तशरणो दीनो, मग्नः संसारसागरे ।
प्राप्येदानीं तारकं त्वां, शरण्यं शरणं श्रये ॥ २१

एवं रैवतशैलमौलिनिलय ! श्रीनेमिनाथ ! प्रभो !,
विज्ञप्तो विनयेन नम्रशिरसा बद्धाञ्जलि त्वं मया ।
यद्युक्तं शरणार्थिनां प्रथयितुं तद् वेत्सि नाथ ! स्वयं,
याञ्चावाक्यकदर्थनां तु सहसे नैवार्थिनामुत्तमः ॥(शा.वि.) २२

## ४१. ॥ श्रीनेमिनाथस्तवनम् ॥

(द्रुतविलम्बित)

निजगुरुक्रमपङ्कजयामलं, समुपनम्य लसद्गुणसागरम् ।
पतनुसंसृतिजन्तुनतं सदा, परमनेमिजिनं प्रकवे मुदा ॥ १

नवघनाघनभूघनदीधितिं, किल फलादनसन्निभशिङ्गिनिम् ।
विकसिताम्बुरुहाम्बकयामलं, नमत नेमिजिनं सुखमन्दिरम् ॥२

पटुपराक्रमभासुरतेजसं, भुजमनामयदाशु वृषाकपेः ।
कमलनालमिवोद्धृतसंसृति-क्षितिरुहोस्तु स नेमिजिनः श्रिये ॥३

विशदशीलतनुत्रमलं तनौ, परिदधौ मदनाभिधवैरिणः ।
परुषपत्रिपराभवसाध्वसादिव स नेमिजिनः शिवशं क्रियात् ॥४

इति हि मयकाऽनावि स्वामी जगत्त्रितयस्य यः,
शुचिकुमुदिनीनाथप्रख्याननः समतानिधिः ।
क्षितिपतियदुश्रेयोवंशाम्बुजन्मविवर्धने,
दिनमणिसमः शैवेयोऽसौ जिनः शुभदायकः ॥ (हरिणी) ५

## ४२. ॥ श्रीनेमिनाथस्तवनम् ।

(अनुष्टुप्)

नेमिनं जगतामीशं, मित्र................. ।
देवदेवं जगद्वन्द्यं, वन्दे राजकलं कलौ ॥ १

प्रमाथं सर्वशत्रूणां, सादितारिभवं विभुम् ।
देहदीधितिरोलम्बं, नवनीरदसन्निभम् ॥ २

श्रीशासनमताम्भोधिसारवर्धनचन्द्रभम् ।
रङ्कीकृतमहाकामं, गर्ववारणवारणम् ॥ ३

मतिमन्तं महाध्येयं, हारकीर्तिप्रभाभरम् ।
भव्यसङ्घातविनतं, वन्द्यविद्यामहेश्वरम् ॥ ४

कर्माष्टमर्मभिदुरं, लावण्यरससागरम् ।
कल्पद्रुमिव जन्तूनां लाभदं लोभवर्जितम् ॥ ५

पवित्रं परमानन्दं, कष्टकोटिविनाशकम् ।
लिङ्गिनां हि महाधुर्यं, तोषकं जगतीत्रये ॥ ६

भूरिभाग्यधरं धीरं, रिपुराज्यहतोदयम् ।
भोगीशसंश्रितं सत्यं, गणाधीशं श्रितश्रियम् ॥ ७

भर्तारं विश्वलक्ष्मीनां, रोगशोकहरं हरम् ।
भगवन्तं क्षमाधारं, वर्णनीयं सदा बुधैः ॥ ८

इत्थं मुदा जगन्नाथो, नेमिनाथो मया स्तुतः ।
श्रियं दिशतु सत्त्वानां शाश्वतीं परमेश्वरः ॥ ९

# ४३. ॥ श्रीनेमिनाथस्तवनम् ॥

(भुजङ्गप्रयात)

जयोग्रादिजम्बालिनीनाथपुत्रं,
शमज्ञं पराभूतदैत्यारिपुत्रम् ।
विभक्त्यादियुक्त्या हितार्थप्रवादं,
जगत्तारकं नौमि धौतप्रमादम् ॥ १

कृताराधनं देववृन्दैश्च धीरं, महानन्ददं प्राप्तसंसारतीरम् ।
शरच्चन्द्रसौम्यं जिताम्भोदनादं, जगत्तारकं नौमि धौतप्रमादम्॥२

सहर्षालिसन्दोहजीमूतभासं, विलोभं विमानं कृतक्रोधनाशम् ।
सुरक्ताङ्कवाल्हीकमाञ्जिष्टपादं,
जगत्तारकं नौमि धौतप्रमादम् ॥ ३

अनन्तेन्दुकोदण्डगात्रप्रमाणं,
कजाङ्गं कजास्यं कजाऽऽनं सुवर्णम् ।
अनिद्रं जिनेन्द्रं मनोज्ञाङ्गभादं, जगत्तारकं नौमि धौतप्रमादम् ॥४

निरीहं विशोकं गुणैराजमानं, गतानेकरागाद्यरिं दत्तदानम् ।
सुधाहारकुम्भोपमं चाविषादं, जगत्तारकं नौमि धौतप्रमादम् ॥५

इत्थं श्रीनेमिजिनवरदुष्टाष्टदोषैर्विमुक्तः,
धात्रीशैरर्च्चितपद-सरोजो दयायुक्तदेहः ।
भक्त्यारोपाग्निरस-विधुवर्षे स्तुतो विष्टपेन,
सम्पूर्णेन्दौ विशदमधुमासे मया मण्डनेन ॥ (मन्दाक्रान्ता) ६

# ४४. ॥ श्रीनेमिनाथस्तोत्रम् ॥

(तोटक)

मुखकान्तिविनिर्जितसत्कमलं, मलवर्जितभूघनमस्तमदम् ।
मदनज्वरवर्ज्जनवैद्यनिभं, निभनामभुजङ्गमवञ्शिजितम् ॥ १

जितदुर्जयमोहमहीशबलं, वलयीकृतकान्तवपुर्महसम् ।
हसनीयकुवादिजयप्रगुणं, गुणरञ्जितसज्जनभुमिभुजम् ॥ २

भुजपादपलम्बितविष्णुहरिं, हरिपाधिपशक्तितिरस्करणम् ।
रणरङ्गविनिर्हतवैरिगणं गणनातिगगेयगुणाभ्युदयम् ॥ ३

दयया परिरक्षितजन्तुवनं वनजोपमपादनतत्रिशम् ।
दशनद्युतिदीप्रमुखैणभृतं, भृतभूवलयं सुकृतैः सततम् ॥ ४

तततामसराशिविनाशकरं, करणाह्वतुरङ्गवशीकरणम् ।
रणरम्यतयानुकृताम्बुधरं, धरणीधरवन्दितपुण्यपदम् ॥ ५

पदपद्मविभूषितमार्गभुवं, भुवनार्च्यचरित्रपवित्रतमम् ।
तमदम्भतयाहृदि नेमिजिनं, जिनदत्तमये द्रियतामनघं ॥ ६

(ष.कु.)

न घनाघनकज्जलकालरुचिं, रुचिरां तनुमीश्वर ! किं वहसि ।
हसितद्युतिसुन्दरवक्त्रजनं, जनयन्दृढमर्जितधर्मकलम् ॥ ७

कलयन् भुवनाद्भूतभाग्यभरं, भरताद्र्धजनेषु मुदं जनयन् ।
नयनैर्जितपङ्कजपत्र ! महन्, महनीयमुमुक्षुमहेन्द्र जय ॥ ८

इति कवीश्वरवाग्विषयीभवन्, भुवनमद्भुतभाग्यभरश्रियः ।
यदुकुलाभ्रनभोमणिमण्डली, जयतु नेमिजगत्रयनायकः ॥ ९
(द्रुतविलम्बित)

गुरुशिष्यनामयुतं यमकमयम्

## ४५. ॥ श्रीनेमिजिनस्तोत्रम् ॥

(अनुष्टुप्)

महिमानल्प ! नेमीश ! महिमानलतुल्य ते ।
महिमानततेः श्लाघ्य ! महिमानवमुक्तिद ! ॥ १

कलयाम ! वयं ब्राह्मे, कलया मतिदं वचः ।
कलयामस्तव स्वामिन् ! कलयाऽमलया युतम् ॥ २

विशारदसमेतेश विशारदरवीद्धगीः ।
विशारदरुचाकुन्द, विशाऽऽरदमिता हृदि ॥ ३

भाऽऽवासमहवारैर्यो, भावासमभये शिवे ।
भाऽवासमनतेर्ज्ञात, भावासमद ! देहि मे ॥ ४

तार-काय-सुरश्रेणी-तारकाऽऽयत-संसृतेः ।
तारकाऽऽय ! गुणाऽपास्त, तारकाय ! नमेन्नते ॥ ५

रामानयननिष्कम्पो, रामान ! यमवर्जित ! ।
रामानयष्ट इष्टागा, रामाऽऽनयमुचां गुणान् ॥ ६

नवनीरदनादाख्या, नवनी-रक्षणं व्यधाः ।
नवनीरततत्वानी नवनीरम्यमुत्तरोः ॥ ७

समानमदमर्त्येशा ! समानमलते गुणान् ।
समानमदनाब्जेन्दु-समानमनसा श्रये ॥ ८

कमला मनतास्त्रैन्द्री, कमलामलदीधिती ।
कमलामतिदौ ! शङ्का, कमलामय हृद्वयम् ॥ ९

परमायद ! क्लृप्ताघ !, परमायमिनः पदम् ।
परमायन् हतोपास्ति, परमाय ! नतास्त्वयि ॥ १०

क्षमापदसदा पावि, क्षमापद सरोरुहैः ।
क्षमापद सनेतेस्त्रा, क्षमापद समान्तिकम् ॥ ११

विभावरीशास्य भवत्यतुल्य, विभावरीनस्यति यस्य भक्तिः ।
विभावरीयोऽगतमङ्गजद्री, विभावरीरीवसुनिर्विशेष ॥ १२
(उपेन्द्रवज्रा)

स त्वं जयोक्त व्रतभावनाग धीरप्रबुद्धाखिलभावनाग ।
मोहद्रूमे यस्य विभावनाग, पत्रालिसान्द्राहि बभाव नागः ॥१३
(इन्द्रवज्रा)

महोदयासक्तसुरेन्द्रपृष्ट ! महोदयायेश ! ममैधि बोधः ।
महोदया धामविशुद्धकर्म, महोदयामोसिथ देहिनां यः ॥ १४

सुपर्वसार्थोऽयमशंसदार-विदारणव्यग्र ! भृशं सदारः ।
तं कामशैले कुलिशं सदार-मञ्चन्नकस्त्वां शिवशंसदार ॥१५
(उपजाति)

विभो ! गदामि स्तवनं तवाब्द-विभो ! गदागम्य शरीरयोभूः ।
विभोगदामोदरविक्रमाद्रा, विभो ! गदाद्यायुधसङ्गहीन ! ॥१६
(उपेन्द्रवज्रा)

संसारवासाय तमोहसेन ! संसेव्य संवित् परमोहसेन ।
निस्सीमभास्वन्महिमोहसेन, हीनो जिन ! त्वं हतमोहसेन ॥१७
(इन्द्रवज्रा)

कारोपमत्तस्मरभीः कृताङ्गि–कारोपमर्त्यामरसेव्य तेषाम् ।
कारोपमः कश्चभवः शुभोपकारोपमन्युस्त्वमुपासितो यैः ॥१८
(इन्द्रवज्रा)

सदामयोषित्पटलं महेन् [न यः] सदा महोल्लासकरौ यदङ्घ्री ।
सदा मयोपास्यत एष भिन्नः, सदा मयोभक्तिभरेण नाथ ॥१९
(उपेन्द्रवज्रा)

त्वद्राषितानां गुणभाजनानां, श्रेणिः सुभाग्यैः सुलभा जनानाम् ।
जगत्त्रयीदत्तशुभाजनानां, गिः संशयानां सुविभाजनानाम् ॥२०
(उपजाति)

स्थितः स मोक्षे विभुतापदेव, मामस्तभव्यान्तरताप देव ।
सा याद्यसा तं जनतापदेव, यस्मै नमस्कृत्य हतापदेव ॥ २१
(उपजाति)

दयेहरीलाप नुताशिषं स, दयेहरीतिप्रददेव तेषाम् ।
दयेहरीणा घनताः सुपुण्यो–दयेहरीशत्विषि ये त्वयीश ! ॥२२
(उपेन्द्रवज्रा)

दिश्याः स मे शस्युपमानवारि–मुखः सुखं त्वं मतिमानवारि ।
मुक्तिः क्षमावीरुदमानवारि, येन स्मरश्चास्यत मानवारिः ॥२३
(उपजाति)

मयागमश्रेणिनयप्रमाणा, मयागमः सेव्यत एष देवः ।
मयागमद्योनमदं समस्ता, मयाऽगमत्तद्विरदो महत्या ॥ २४
(उपेन्द्रवज्रा)

नवा त्वयि ध्वस्तसुधामहेलाऽवाप्तामराली बहुधा महेलाः ।
वा चिक्षिपुस्त्वां गुणधामहेला,
दक्षाः सुराणां विविधा महेलाः ॥ (उपजाति) २५

कोपायशाखीभन तुभ्यमस्त-कोपाय शास्त्रे शमिनां शिवस्य ।
कोपायशाम्यद्दुरित प्रभावौ, कोपायशोनाथ नमस्करोति ॥२६
(इन्द्रवज्रा)

प्रभो ! निरस्तस्फुरदक्षमाय, तं याति भीतिक्षयदक्षमायः ।
तुल्यं नमस्यत्यमदक्षमाय, रक्षासु पुंसां विशदक्षमाय ॥ २७
(उपजाति)

मुक्तावदान्योत्तम ! येन दोषा, मुक्तावदारौत्सुकनन्दसत्त्वम् ।
मुक्तावदातोरुगुणद्रुमाम्भो, मुक्तावदास्ते रविरेष यावत् ॥२८
(इन्द्रवज्रा)

भवान् भवाब्धिर्निजपादराग-जितारुणाम्भोज ! कृपादराग ! ।
धैर्येण भव्यालिमपादराग, रणेऽस्तलक्षक्षिति पादरागः ॥ २९
(उपजाति)

महानयस्थान सृजन्तु पुंसां, महानयस्तस्य तवेश वाचः ।
महानयः शार्ङ्गिवधूभिरिद्ध, महानयः क्षोभमलोभनीतः ॥ ३०
(उपेन्द्रवज्रा)

वन्दे जिनं सर्वकलापदन्तं, सदा मुदा कुन्दकलापदन्तम् ।
कुर्वन्तमुच्चैः सकलाऽऽपदन्तं,
गुणावली यस्य कलापदन्तम् ॥ (उपेन्द्रवज्रा) ३१

यस्त्वां श्रीजिन ! शीर्ण तमसं भूशोकनाशेश्वरं,
सद्वाचं विमलस्तुतेऽमितमुदानङ्गप्रभाखण्डनम् ।
यत्नाद्रम्यदयं शिवासुतमिति प्राणिप्रियं रक्षतं,
तन्द्रापायनिरासका भयभवारम्भादनं तद्द्रुतम् ॥(शा.वि.) ३२

पञ्चवर्गपरिहार-मयम्

## ४६. ॥ श्रीनेमिनाथस्तवनम् ॥

(य्-र्-ल्-व्-श्-ष्-स्-ह-अष्टव्यञ्जनोपयोगमयम्)

शैवेयसार्वं सरसं सहस्रवर्षायुषं शीलसरोरुहांशुम् ।
सेवेऽहसं संवरवैरिवारि-
वाहस्य वायुं शिवशं यियासुः ॥ (इन्द्रवज्रा) १

वयस्य विश्वावलयस्य सर्वसहर्षहर्यश्वरसेशसेव्य ! ।
सहासयोषाविसरोरुहावैरविह्वलश्रेय ऋषीश ! राहि ॥ २
(उपेन्द्रवज्रा)

सर्वंसहायां विससारहारि, विहाय सीलाविवरेसु लीलम् ।
उल्लासि शैवेय यशोहरस्व-
र्वशेश हंसावलिसावहेलम् ॥ (उपजाति) ३

श्रीशैवेयं हारदूरारसाला, सुव्याहारं शिश्रियुर्ये विशालम् ।
शश्वल्लोलं स्वैरिविश्वार्यवश्यं,
ह्याशूवास श्रेय एषां सवेशे ॥ (शालिनी) ४

शेषसहस्त्रवसुव्ययराहो, या वरसोस्त्रशयांह्रिसलीलं ।
आर्यसुलास्यरसेस्यसिशंसा,
श्रीवरसारविहासिसहासं ॥ (दोधक) ५

सारसारसवरास्य ! शरीर-व्यूहसंशयरसाव्ययसीर ! ।
अंहसां हि सहसाहरराशिं वारलावर ! शिवोरुसरस्याम् ॥ ६
(स्वागता)

वासवालिवरिवस्य ! वै सुरी-वाररासविषये रसश्रय: ।
वीषयाहरसि हर्षवल्लरीष्वालवाल-सुवृषश्रियं स्वया ॥ ७
(रथोद्धता)

व्यशसीरलसोवशास्वहो, विषयाशांविषयूषवल्ल्यी ।
उरशीलरसेविशैशवा, वसरेलं वयसीश हेलया ॥ (प्रबोधिता) ८

अवार्यवीर्यो विषयैरुषेश्वर:, शिवाविशालाशयसंवरालये ।
विहारहारै: सरलैर्वरीयसीं,
श्रियं स्वयं रासिरसावशोरसि ॥ (वंशस्थ) ९

हरिवंशवहेशशशीष्यवृषव्यवहारविशेषरसूलरसे ।
अयसारहरेरुरुशैर्यशयं,
सरलं सरयं महसावशय: ॥ (तोटकम्) १०

साहसावाससर्वंसहारं शिर: - शूलवंहीयसां वारयाश्रेयसाम् ।
वैर्यवश्यायवाराश्रयाशावृषं,
रंहसा हीलविश्वासशालाविशाम् ॥ (स्त्रग्विणी) ११

वरीयोवसायाश्रयोविश्रसो यैः,
शिवासूरसावाश्रवैः शिश्रियेऽलम् ।
विलोलाश्रवाऽहौविहायोर्य एषु,
श्रियः सर्ववेलर्वहेयुर्वुवूर्षा ॥ (भुजङ्गप्रयात) १२

अवि-शश-र्यविसारि-सुसारसं, रुरुवराहसरौहिषसंवरम् ।
अवसि वैरिशशारुरहिंसया
विरहशल्यवशं विरसारवम् ॥ (द्रुतविलम्बित) १३

वासः सुवेषवसुहारिहयं रिरासो,
रीशस्यहेलिसुवसोरिह रोरराशौ ।
आशासु विश्ववरशीलयशोविवेशा,
ऽशेषासु शेषशिवशैलशिलाविलासि ॥ (वसन्ततिलका) १४

इष्वासाऽसी अरियवशरं सौवयोरर्हयोर्ये,
श्रीवासायश्रयसि शययोरीश्वरांह्रयोरवश्यं-।
शैवेयारं हरि-वरवृषौवासवाहार्यसिंहौ,
वारीशं वाससरसिरुहं सेव्ययोः शस्य वस्वोः ॥ (मन्दाक्रान्ता) १५

असाहाय्यः सायं य उषसि सिवव्यूह ! वयसाम्,
सुसालं संवासेऽहर-हरि-हसंवेशविरहे ।
सिषेवे शैवेयं सुरविसरशस्यं सवयसम्,
स शुश्रूषे सालं वरवृषरहस्यं-ह्यवससौ ॥ (शिखरिणी) १६

श्रेयोलालसविश्ववीरविलसल्लीलारिशांस्याहवे,
हंसेर्यो हरिवंशवर्यसरसश्रीशीर्षहीरो रुषाम् ।
हंस्येलाविशरारुवाललवलीसर्वस्वसुस्वास हे !,
सूयावाहवृहल्लुलाय सहसाशंव्यालहिंसाहरे ! ॥ (शा.वि.) १७

विस्त्रांहोवारिराशेरविरललहरी व्यासकृष्योर्वशे यः,
संसारायासविश्वारुहविलय उरो हव्यवाहो विवाह ।
आवासे वै शिवाह्वे शिवसलिलसरः शोषसूरार्यवर्षा,
सारो वावस्य सेरं वरसरसरवः संवरव्रीहि शस्ये ॥ (स्त्रग्धरा) १८

इति विगलदवद्यः त्वां जिनेशानुवद्यः,
प्रकटितशिवपद्य प्राज्यविभ्राजिविद्य ! ।
तमसमदयसद्यः पाहि नेमे ! प्रसद्य,
प्रचुरमहिमहृद्य ! क्लेशराशेस्त्वमद्य ॥ (मालिनी) १९

## ४७. ॥ श्रीनेमिजिनस्तुतिः ॥

विहितनवर्द्धितरङ्गो वर्द्धितरङ्गोऽखिलेपि योगिजने ।
भवदवघनाघनोदक ! घनाऽघ नोदक ! जिनेश ! जय ॥ १

प्रशमरससकलसभाजन सकलसभाजनमनोहरा देव ! ।
वाणी ममतारहिता मम तारहिता दिशतु शं ते ॥ २

संसारः परमगदः परमगदस्तत्र ते वचनमिह ये ।
बिभ्रति काममलसताममलसतामाशु ते शोच्याः ॥ ३

यादवजिन ! भवतारण ! भवता रणरङ्गविमुखचित्तेन ।
शमतोभावारिबलं भावारिबलं कथं निहतम् ॥ ४

दुरितोदधिकन्दर्पा दधिकन्दर्पाच्च किं मुने ! त्रससि ।
सविधेऽस्य हि मदनाशा मदनाशा देव ! न स्फुरति ॥ ५

नहि जग्रसे नतनयोग्रसेनतनयोद्धतेन मारेण ।
तव वरविक्रमकमऽलं क्रमकमलं शरणमालीना ॥ ६

दधदिव चिरमधिकं दरमधिकन्दरमागतोऽसि येनेह ।
धृतिबाधिका महेलाधिकामहेलारिपुर्विषमः ॥ ७

भवतरु नेमे हरन्ति तं विषया अविचारा मानरमयन्ति ।
........................................... ॥ ८

दुर्जेया हरिणाक्षो हरिणा क्षीणौजसेवायाऽमानि ।
तृणमिव सानवमरसा नवमरसाढ्येन भवता तु ॥ ९

भूषितरैवतकाचल ! बत काचलवाशयेपि सुररत्नम् ।
को रसिकः कामेहित कामे हितमुज्झति वचस्ते ॥ १०

विध्वस्तमदामोदर ! दामोदर वन्द्य ! भवति परितुष्टे ।
विषमायुध विषमोहे विषमोहे न पतति जनोऽयम् ॥ ११

बह्वायोधनवसुधा धनवसुधामभिरलं मम मुमुक्षोः ।
स्वामिंस्तव परिचरणौ परिचरणौत्सुक्यकलितस्य ॥ १२

त्वां मोहवनधनञ्जयनधनञ्जयशेखरस्त्रियो नापि ।
याचति चलननतावक ! न न तावकदर्शनं तु सदा ॥ १३

नाना-छन्दोमय-

## ४८. ॥ श्रीनेमिनाथस्तवनम् ॥

श्रीशैवेयं शिवश्रीदं, छन्दोभिः कैश्चिदप्यहम् ।
कन्दर्पविजयप्राप्तास्तोकश्लोकश्रियं स्तुवे ॥ (पथ्या-वक्त्र) १

प्रभो ! **नगस्वरूपिणी** रिता त्वयि प्रयातु मे ।
महत्त्वमम्बुदालिवत्तनुप्रमाणा (**प्रमाणिका**)ऽपि गीः ॥ २
(नगस्वरूपिणी-प्रमाणिका)

मेघश्यामश्रीमन्नेमे ! **विद्युन्मालावन्मां** मुक्त्वा ।
का ते शोभा भूभृच्छृङ्गे, राजीमत्येत्युक्तो जीयाः ॥ ३
(विद्युन्माला)

वैतालीयं यथा गुरौ स्या**दौपच्छन्दसकं** श्रितेऽक्षरेऽग्रे ।
अपि मिथ्यादृग् तथा सुदृग् स्या-
त्त्वदुत(क्त)तत्त्वे संश्रिते जिनेन्द्र ! ॥ (औपच्छन्दसकम्) ४

**वक्त्र**सुधाभीशुस्तेऽधीश ! स्फीतमुदे नो नव्यः कस्य ।
यः सततं निर्दोषासङ्गस्त्यक्तकलङ्कः पद्मोल्लासी (वक्त्र) ॥ ५

किल सकलां मुखलक्ष्मीं, जिन ! जयिनीं तव वीक्ष्य ।
भजति भिया **शशिलेखा**, गुरुगिरिशालिकदुर्गम् ॥ ६
(शशिलेखा)

तव पादैः श्रितसर्वसमत्वैर्धरयाऽऽधिक्यमवापि दिवाऽपि ।
**आपातिलका** (आपातलिका)तोऽधिकला
किं तैरपा (रपरा)न्तिकयेश ! न लेभे ॥ ७
(आपातलिका-अपरान्तिका)

भिन्दत्**युद्धत**मोहतमिश्रं, गोभिर्भासितविष्टपभावे ।
स्वामिंस्तेऽभ्युदितेऽपि मुखेन्दौ,
चित्रं शोषमियर्त्ति भवाब्धिः ॥ (उद्धत) ८

**रुक्मवती**श ! क्ष्माभृति शक्रैर्जन्ममहे ते **चम्पकमाला** ।
न्यासि मुदा कण्ठे त्रिदशस्त्रीलोचनभृङ्गस्मेरितमोदाः ॥ ९
(रुक्मवती-चम्पकमाला)

गन्धर्वैस्तव सुस्वरैर्यशोगीतं पीतमवीतसुस्पृहैः ।
स्वामिन् ! निर्जितशीतरुक्सुधा, गङ्गा**शुद्धविराट्** सुराधिपैः॥१०
(शुद्धविराट्)

मात्राणामिव तन्वता त्वयाऽष्टादशकं ब्रह्मभिदां पदे पदेऽर्हन् ।
**औपच्छन्दसकापरान्तिका**वद्,
यतिगणवृत्तविदाऽऽरचि व्रतश्रीः ॥ ११
(औपच्छन्दसकापरान्तिका)

चूर्णीभवन्त्यङ्गभृतामघौघाः काठिन्यवन्तोऽपि तव स्तवेन ।
स्वामिन् ! नतामर्त्यनरे**न्द्रवज्रा**घातेन शैला इव निर्विलम्बम्॥१२
(इन्द्रवज्रा)

**उपेन्द्रवज्रा**युधपन्नगेन्द्रैरुपासितस्त्वं स्मितकैरवाक्षैः ।
सदास्यशीतद्युतिचन्द्रिकाम्भः
पिपासुभिर्नाथ ! निरन्तरायम् ॥ (उपेन्द्रवज्रा) १३

आख्यानि कीदृग् निजदुःखजातं, तवाऽग्रतोऽहं व्यथका यदेते ।
मुञ्चन्ति नाऽद्याप्यु**पजाति**भृङ्गा,
इव प्रभो ! मां मलिना अघौघाः ॥ (उपजाति) १४

**दोधक**मुख्यसुवृत्तनिबद्धै रासशतै रसवद्भिरधीश ! ।
निर्जरनागनभश्चरनार्यः कुत्र जगुर्न भवत्सुभगत्वम्(दोधक)॥१५

स्वःस्त्रीकुलमुज्ज्वलनाट्यरसात् साक्षिभ्रमिसन्मुख**मोटनक**म्।
नानाकरणोद्भटमप्यहरच्चित्तं न तवेश ! रतीशजितः ॥१६
(मोटनक)

कामं स्वामिंस्त्वदमलचलनाम्भोजस्फूर्जद्**भ्रमरविलसिताः** ।
मर्त्याः प्रापुः प्रमुदितमनसः, कल्याणश्रीरसमसमतरम् ॥ १७
(भ्रमरविलसित)

पादाम्भोजं पुण्यसौरभ्यलोभासङ्गिस्वर्गिश्रेणिभृङ्गावलीकम् ।
सद्भावाम्भः **शालिनी**श ! त्वदीयं,
वासं शश्वन्मानसे मे वितन्यात् ॥ (शालिनी) १८

नाथ ! विष्टपकृपा**ऽपरान्तिका** यात विश्वमहिता पदद्वयी ।
पूरिताखिलमनो**रथोद्धता**नन्ततापशमनाय मेऽस्तु ते ॥ १९
(अपरान्तिका-रथोद्धता)

यैस्तव स्तवनकर्मणि वाणी, **स्वागता**घततिभिर्विनियुक्ता ।
ते भवन्ति भवनाधिपतित्वं,
प्राप्य नाथ ! जगति स्तवनीयाः ॥ (स्वागता) २०

भवता ददता **प्रबोधितां** ध्वनिना दत्तहरित्प्रतिश्रुताम् (श्रिताः?)।
अमृतप्रद ! के न निर्न्यिरे,
मुदिरेणेव रयेण विस्मयम् ॥ (प्रबोधिता) २१

मुक्ताफलेन जिनेन्द्र ! यादवक्षोणी**न्द्रवंशा**ग्रमलङ्करिष्णुना ।
निस्त्रासनैर्मल्यवता कृतस्त्वया,
कस्को न दृग् मार्गगतेन मोदभाग् ॥ २२
(इन्द्रवंशामिश्र-उपजाति)

चलन्महीरत्नमयध्वजांऽचलच्छलान्नरीनर्ति जगत्पते ! तव ।
यशस्ततिर्विष्टपदिष्टविस्मया,
सुतुङ्ग**वंशस्थ**नटीव सर्वदा ॥ (वंशस्थ) २३

भक्तिसस्पर्धवर्धिष्णुसत्संमदा,
नाथ ! जज्ञे जनालीनमन्मौलिका ।
तावकीनाङ्घ्रिपद्माग्रजाग्रन्नख-
प्रोन्मिषज्ज्योतिषां श्रेणिभिः **स्रग्विणी** ॥ (स्रग्विणी) २४

**द्रुतविलम्बित**भावविवर्जिता, सकलजन्तुहिता गतमत्सरा ।
जयतु ते युगपज्जनकोटिहृत्-
प्रभवसंशयसंहरिणीश ! वाक् ॥ (द्रुतविलम्बित) २५

वरजाङ्गुलीव जिन ! यच्छ्रुतिषु,
**प्रमिताक्षरा**ऽपि तव गीरविशत् ।
तरसा ततोऽनशदशेषमपि,
स्फुटदर्पदर्पकमहाहिविषम् ॥ (प्रमिताक्षरा) २६

प्रिय ! भूषय मां भव माऽभिमुखः,
परि**तोऽट क**लङ्कय मा स्वबलम् ।
इतिवाक्यमिदं श्रवणेऽप्यवह-
न्नवधीश ! रयाद्द्रवता मदनः ॥ (तोटक) २७

नरेन्द्रान्वयोद्भूत ! निर्धूतदोष ! प्रभूतप्रभाव ! प्रभो ! सत्कलाब्धे!।
विदर्पीकृतोद्यन्मनोभू**भुजङ्ग** !,
**प्रयातं** शिवं कैर्न हित्वा नमद्भिः ॥ (भुजङ्गप्रयात) २८

प्रमुदितवदनाः **प्रभा**भासुराः प्रणयभरभृताः सुपर्वाङ्गनाः ।
भवति नतिकृतां जनानां विभो !
वदति दिवि सदाशिषः शम्पुषः ॥ (प्रभा) २९

स्वामिन् ! मूर्तिर्**जलधरमाला**वत्ते,
कामं श्यामा रचयति तापापास्तिम् ।
आतन्वाना सुकृतलताविस्तारं,
तच्चित्रं यज्जनयति हंसानन्दम् ॥ (जलधरमाला) ३०

स्थाने तन्म(मृ)त्यै यद्धि दोषाकरः स्यान्-
मिथ्याबुद्धिं श्राग् **वैश्वदेवी**मवाप्य ।
तच्चित्रं मैत्रीमाप्य भास्वानपि त्वं,
जन्तूनां धत्से नाथ ! यत्सिद्धियोगम् ॥ (वैश्वदेवी) ३१

**जलोद्धतगतिः**कृताऽघविततिस्त्वदुक्तविरतिः कुसङ्गतिरतिः।
प्रनष्टसुमतिर्जिनेश ! कुमति-
र्जनः शिवगतिश्रियं न भजति ॥ (जलोद्धतगति) ३२

लभते स्तुवन् केकिरवं जयद्भिर्दुरितपुटविभेदिन् ! मञ्जुशब्दैः ।
तव पद**तामरसं** भुवि भव्यः
कुसुमविचित्रावलिभिरिहाऽर्चाम् ॥ (तामरस) ३३

सत्कीर्तिकान्तिलिलितास्तपूर्णिमा-चन्द्र ! वर्त्मसुगतेर्भुवि भविनाम्।
विशति नाथ ! तव गीः **प्रियम्वदा**,
स्वरविनिर्जितलसत्कलहंसा ॥ (प्रियम्वदा) ३४

भगवन् ! गुण**मालभारिणी**नां, निजमाधुर्यपराजितामृतानाम् ।
द्रुतविद्रुतवैरसंशयानां,
न गिरां ते श्रवणं वितन्वते के ? ॥ (मालभारिणी) ३५

अत्यन्तं मधुरिमकान्तिसौकुमार्यौदार्यौजोद्धुतसमताप्रसत्तिमन्ति।
काव्यानि श्रवणवदीश ! ते निपीया-
ङ्गानि श्राग्मम नयने **प्रहर्षिणी** स्ताम् ॥ (प्रहर्षिणी) ३६

मूर्च्छत्पाथोवाहमहागर्जितनादैर्नित्यं नृत्यन्मञ्जुरवन्**मत्तमयूरम्** ।
शैलं कीर्तिस्ते विकसत्केतकराजी–
वातिस्फीता रैवतकं वासयतीश ! ॥ (मत्तमयुर) ३७

मदनं विजेतुं किमिमं महाकरं, गिरिकुञ्जरं गैरिकनागजाञ्चितम्।
श्रितवान् **सुदन्तं** गुरुपादसुन्दरं,
त्वामिन ! श्रवन्निर्झरदानसंवरम् ॥ (सुदन्त) ३८

नृपकन्यकाऽक्षिहृदयाभिनन्दिनी,
सपदि त्वयौज्झि मृदु**मञ्जुभाषिणी** ।
निजरूपनिर्जितसुराङ्गनाऽपि सा,
जिन ! नित्यनिर्वृतिसुखाभिलाषिणा ॥ (मञ्जुभाषिणी) ३९

**कुटिलगति**करं तं जगद् घस्मरं,
मदनविषधरं निर्विषत्वं नयन् ।
त्वमसि यदि जिन ! स्वर्णकायस्तदा,
मरकतमणिवत् कृष्णकायः कथम् ॥ (कुटिलगति) ४०

तृणवद्दिवं दिविषदो गणयन्त–
स्त्वदुपान्तमीश्वर ! मुदाऽधिवसन्ति ।
स्मितकेतकीकमपहाय वनं किं
मधुपाः स्फुटं **कुटज**राजि भजन्ति ॥ (कुटज) ४१

न ते ध्यानध्वंसं **चन्द्रिणी** चन्द्रकान्तं,
व्यधित नाथाङ्गहाराद्भुताऽ**प्युर्वशी** ।
तथा वनी शुचि**रुचिरा**म्रमञ्जरी,
गुञ्जत्पिकोन्मदमधुप ! **प्रभावती** ॥ ४२
(चन्द्रिणी–उर्वशी–रुचिरा–प्रभावती)

शमयति झगिति श्रमं समन्ताद्
घनरसलब्धविवृद्धिरीश ! गीस्ते ।
अभिमतफलदायिनी जनानां
त्रिदिवलते ! वरदांशु**पुष्पिताग्रा** ॥ (पुष्पिताग्रा) ४३

शमयत् परं(न्त्यरं) गुरुतमांसि, कुवलयविबोधनोद्धुराः ।
गाव इह न तु जडत्वभृतो
भगवंस्तवाऽऽननसुधाक**रोद्गताः** ॥ (उद्गता) ४४

श्रीमन्नेमीश्वरेति स्तूयसेऽद्वैतशोभः,
सोत्साहं छन्दसां यैर्भङ्गिभिस्त्वं शिवासूः ।
मर्त्यैः सम्प्राप्यते तैः क्लृप्तदुष्कर्मपूर-
प्रध्वंसैर्मोक्ष**लक्ष्मी**सङ्गसौख्यं महीयः ॥ (लक्ष्मी) ४५

## ४९. ॥ श्रीरैवतपतिजिननेमिनाथस्तवः ॥

(द्रुतविलम्बित)

विमलकेवलकेलिपरायणं शमरमाऽपरिभङ्(ग)नरायणम् ।
नवभवागतभोगनिरञ्जनं नमत नेमिजिनं जनरञ्जनम् ॥ १

चतुरलोकचकोरनिशाकरं हरिकुलाम्बरदीप्तिदिवाकरम् ।
मदनमत्तमतङ्गजगञ्जनं नमत नेमिजिनं जनरञ्जनम् ॥ २

भविकमानसवाससितच्छदं विशदकोकनदाभरदच्छदम् ।
विकटमोहमहाभटभञ्जनं नमत नेमिजिनं जनरञ्जनम् ॥ ३

नतजनाऽमितकामितकारणं स्मरमहातरुवारणवारणम् ।
नयनमञ्जिमतर्जितखञ्जनं
नमत नेमिजिनं जनरञ्जनम् ॥ ४

स्वपदपावितपर्वतरैवतं नरसुरासुरनायकसेवितम् ।
स्व-तनु-भानु-वरीभवदञ्जनं नमत नेमिजिनं जनरञ्जनम् ॥५

इति नुतिं गमितः शमिनायकः सकलमञ्जुलमङ्गलदायकः ।
सृजतु नेमिजिनो मम सर्वतो विजयमेव सदासुखकारणम् ॥६

## ५०. ॥ श्रीनेमिनाथस्तवनम् ॥

(तोटक)

सुविशालशिवालयजातलयं कृतमोहनरेन्द्रबलप्रलयम् ।
विनमामि जगत्त्रयबोधिकरं, गिरिनारविभूषणनेमिवरम् ॥ १

प्रणमामि नरेश्वरवन्द्यपदं परिवर्जितमारविकारमदम् ।
हरहासविकारयशःप्रसरं, गिरिनारविभूषणनेमिवरम् ॥ २

कमलोदरकोमलपादतलं गणनापरिवर्जितबाहुबलम् ।
जनताऽऽश्रयसंशयदोषहरं, गिरिनारविभूषणनेमिवरम् ॥ ३

भवभीममहोदधितारतरिं करणद्विपकुम्भकठोरहरिम् ।
वरतारतुषारगुणौघधरं, गिरिनारविभूषणनेमिवरम् ॥ ४

नतनम्रसुराऽऽसुरराजगणं तुहिनत्विषिनिर्मलशीलगुणम् ।
पदपङ्कजलीननिधिभ्रमरं, गिरिनारविभूषणनेमिवरम् ॥ ५

पटुवाणिजिनौघकृतस्तवनं विहितान्तरबाह्यरुजाशमनम् ।
प्रणमाम्यहमस्तसमस्तदरं, गिरिनारविभूषणनेमिवरम् ॥ ६

भुवनत्रयपद्मविबोधरविं मदपर्वतशृङ्गविभङ्गपविम् ।
नमताऽमृतसौख्यविधानपरं, गिरिनारविभूषणनेमिवरम् ॥ ७

परिवर्जितबन्धुकलत्रधनं नरकादिकडम्बरदावघनम् ।
विनताऽमलकेवलबोधिकरं, गिरिनारविभूषणनेमिवरम् ॥ ८

इति नेमिजिनेश्वर ! सकलसुरेश्वर-नतदेवेन्द्रमुनीन्द्रगुणम् ।
गिरिनारविभूषण ! विगलितदूषण !
भवभयशम्भवभयहरणम् ॥ ९

## ५१. ॥ श्री नेमिनाथजिन-अष्टकम् ॥

पूर्वे या रसरङ्गतश्चिरतरं भुक्ताङ्गनास्तास्त्यजन्-
नन्यस्त्रीणिवरूपलोलितमना नो भाति भव्यो जनः ।
ध्यात्वेत्थं प्रतिपन्नपालनपटुः सर्वत्र कारुण्यवान्
यो जन्मावधि मुक्तिमेव न परां भेजे स नेमिः श्रिये ॥ १

ध्यानाग्निज्ज्वलनेनात्तभिगताजीवालिरक्षाख्यया
स सिद्धो रस एष जन्तुरक्षणमतश्चक्रे तथा कारयत् ।
त्वत्संगाद् रसवेदतः शरनगं म्लेच्छादतुच्छाज्जनं
रक्षन् रैवतको दधात्पुयारिनो हिंस्रान् पशून् श्रीजिनः ॥ २

सांतत्याजयदी(ती)ह यादवपती रूपेण सा का(की)दृशी
द्रष्टुं नाम पुरा(ऽ)गमत् शिवकनीं राजीमती सस्पृहा ।
पञ्चानतकमेव वीक्ष्य न परं हृष्टा(ऽ) य दध्यौ जिनौ
मां कृत्वा वसुखे त्रिलोककमलातीतस्थिताहोऽभवन् ॥ ३

किं पुण्यं फलितं कुकर्म दलितं जाताः प्रसन्नाः सुराः
यद् रैवन्तगिरावनं तरुवतो नेमेर्नमस्याऽभवत् ।
आ ज्ञातं लभते निगोध(द)भवतो जन्तुस्त्रसत्वं यथा
लब्ध्वा नद्वदिहारितस्तव कृपा सर्वं प्रसन्नं ततः ॥ ४

कुग्राहाश्रयपङ्क्लिोर्म्मिचपलैः क्षारैर्जडैर्वर्धितः
यं खौनिर्म्मलकान्तिसुस्वरतरः सल्लक्षणैर्दक्षिणः ।
जाता लक्ष्मवशात् त्वहं गभजनात्तातास्मि त्वच्छे(त्से)वको
भृत्यः कर्मकरपदाम्बुजरजः कुर्यात् कृपां मय्यपि ॥ ५

तानत्वं जयजादवाम्बुधिविधो कारुण्यकेलीनिधिः
दुष्प्रापश्चिरकालतः सुकृततो लब्धोऽधुनाऽतो मम ।
धन्यो वासरजन्मकायकरणव्यापारभारोऽथवा
सर्वे मे सफलं त्वदीक्षणवशादासंसृतेर्वेष्टितम् ॥ ६

रूपं सोभाग्यभङ्गां मदनमददमं तज्जरासिंदुसैन्या
(सैन्या)कारं मुरारेर्भुजबलदलनं तोरणात्तां निवृत्तिम् ।
कालिं दत्ताक्षिशान्ति वचनमनुपमं केवलद्विन्त्रिलोकी
कोकीभानुं स्तवीमि त्रिभुवनविजयी नेमिनेतुश्च किं किम् ॥७

राज्यं भोगगणो भवान्नहिमिव त्यक्त्वा तपःसंयमी
कृत्वा प्राप शिवान्दिरां त्रिजगतीनाथो(ऽ)पि सन् नान्यथा ।
मोहार्तो विषयी तपस्यचिरतो लुब्धो(ऽ)पि याचे कथं
त्वत्तो मोक्षसुखं परं प्रथय मे त्वं सेवकत्वं सदा ॥ ८

## ५२. ॥ श्रीनेमिजिनस्तवनम् ॥

इन्द्रोपेन्द्रौ पुनर्नत्वा, जिनेन्द्रमथ नेमिनम् ।
प्रारेभाते स्तोतुमेवं, गिरा भक्तिपवित्रया ॥ १

नमस्तुभ्यं जगन्नाथ ! विश्वविश्वोपकारिणे ।
आजन्मब्रह्मनिष्ठाय, दयाधीराय तायिने ॥ २

स्वामिन् ! घातीनि कर्माणि, स्वानि घातितवानसि ।
शुक्लध्यानेन दिवसै-श्चतुःपञ्चाशतापि हि ॥ ३

न केवलं यदुकुलं, त्वया नाथ ! विभूषितम् ।
इदं जगत्त्रयमपि, केवलालोकभास्वता ॥ ४

अस्ताघो यस्तथा स्वामि-न्नपारश्च भवाम्बुधिः ।
गुल्फगोपदमात्रं स, स्यात्त्वत्पादप्रसादतः ॥ ५

पू.आ.श्री शान्तिसूरिविरचितम्

## ५३. ॥ श्रीनेमिजिनस्तवः ॥

(अनुष्टुप्)

मानेनानूनमानेन, नोन्नमुन्नामिमाननम् ।
नेमिनामानममम, मुनीनामिनमानुमः ॥ १

नानाऽमानामनिम्नाना-ममानानामनामिनाम् ।
नामिने नामिनामोमे(म्रे), नेमिनाम्ने नमो नमः ॥ २

माने नोन्नामिनं नाम, न नानिम्नममानने ।
ननु नेमिममी मेना-मोमानामनमन्निनाः ॥ ३

मिन्नमन्मनमामानि-मानिनीमाननोन्मनाः ।
ना नानाऽमीमनन्नेर्मिं, मनोममिममानिनाम् ॥ ४

मनोमुन्निम्ननं नून-मुन्नमन्माननोननम् ।
नुन्नमेनोऽमुना नेमि-नाम्नाऽऽम्नानेन मामनु ॥ ५

नोनमुन्मानमानेन, मुनीनानेममाननम् ।
मीनानर्मिं नमन्नेमि-मनूनामामिमीम माम् ॥ ६

मुनीनमेनोमीनानां, निमाने नेमिमानिनम् ।
नेमिनामानमानाना–ममोमानममुं नम ॥ ७

नेमीनमननं नेमि–नमनं नेमिमाननम् ।
नेमिनाम्नो न नाम्नान–माना नूनममी मम ॥ ८

इति स्तुतिं ये पुरतः पठन्ति, श्रीनेमिनो व्यञ्जनयुग्मसिद्धाम् ।
श्रीवर्धमानोदयशालिनस्ते, स्युः सिद्धिवध्वाः परिभोगयोग्याः॥ ९

## ५४. ॥ श्रीनेमिजिनशतकम् ॥

हर्षादुल्लसितैः स्मराद् विकसितैः प्रोन्मीलितै रागतो,
लज्जामन्थरितैर्भयात् तरलितैर्विस्फारितैर्विस्मयात् ।
अन्तःस्नेहभरालसैः प्रियतमप्रेमार्द्रभावीकृतैः,
श्रीनेमिर्न चचाल रागरहितः कान्ताकटाक्षैर्नवैः ॥ (शार्दूल.)१

बालां पूर्णेन्दुकान्तिं प्रथमवयसि प्रेयसीं यः प्रहित्वा,
तस्थौ वै रैवताद्रेः शिरसि सरसान् कामभोगान् विहाय ।
वाचं नैवाऽनुमेने हरिमुशलिनोः प्राणिरक्षाप्रवीणो,
राजीमत्याः कुचाभ्यां कठिनहृदयः सोऽस्तु नेमिः शिवाय ॥ २
(चित्रमाला)

निस्तर्हणं प्राणिगणस्य मत्वा, कृपायुतो यः प्रजहौ च कामिनीम्।
भवानुबद्धामवियुक्तप्रेमां, राजीमतीं रागमतीं तदानीम् ॥ ३
(उपजाति)

द्वारावत्यां नगर्यां जलशयनृपतिः क्षीरडिण्डीरकीर्तिः,
श्रीनेमिस्तत्र नाथः कमलनयनरुक् सद्घनस्निग्धकायः ।

गोविन्दो राजकन्यां विशदगुणवतीं नाम राजीमतीं च,
सम्पप्रच्छोग्रसेनं नरपतिचतुरं पाणिपीडाय नेमेः ॥ (स्रग्धरा) ४

नारायणो नेमिजिनं बभाषे स्वामिन्नहो ! धैर्यमतिप्रकर्षः ।
किमेककान्तां न करोषि रम्यां ?,
मन्यस्व वाचं नरदेवदेव ! ॥ (उपजाति) ५

भवादृशां नाथ ! न कोऽपि बोधकस्तथाप्यहं त्वामभिवक्तुमीशे।
पाणिग्रहं चारु भवान् विदध्यात्,
यथा दशार्हा मुदिता भवेयुः ॥ ६

भवेप्यरागी विभवेप्यरागी, संसारवारान्निधिसेतुभूतः ।
त्वं वर्तसे यादव ! रागशून्यः, किलाऽद्य पित्रोर्वचनं विधेहि ॥७

ये वीतरागा ऋषभादयस्ते, सर्वेऽपि पाणिग्रहणं विचक्रुः ।
सिद्धिं च जग्मुर्ननु नेमिनाथ !,
प्रसीद योषाकरणे त्वतस्त्वम् ॥ ८

श्रीनेमिर्विजितेन्द्रियोऽप्यवधियुक्, शश्वद्घृणातत्परो,
भोगस्नेहविवर्जितस्तदपि यो, मेने हरेस्तद्वचः ।
कृष्णः श्रीजितसुन्दरीं वरकनीं, श्रीउग्रसेनात् ततः,
पुत्रीं याचितवांश्च नाभससिते, पक्षे तु षष्ट्यां तिथौ ॥(शार्दूल.)

निर्वर्णनाऽर्थं किल रूपसम्पदामधोक्षजः सात्त्वतमादिदेश ।
या भाविनी नेमिविभोश्चिरण्टी,
सा कीदृशीत्याऽऽशुनिरीक्षतां हि ॥ (उपजाति) १०

अथौग्रसेनीं प्रविलोक्य माधवं, स सम्बभाषेति विलोकिता कनी ।
यथा प्रयत्नेन कृतः स राजसूस्तथा कृता केन तदीय वल्लभा॥११
(उपेन्द्रवज्रा)

(उपजाति)

पराङ्गनावर्णनके प्रयोजनमस्मादृशां नाथ ! न चाऽस्ति किञ्चित्।
तथाविधानां तु यथार्थभाषया,
जिह्वा पवित्रीक्रियते नितान्तम् ॥ १२

यदीय लावण्यतरुः प्रवृद्धः, प्रफुल्लितो लोचनकैरवेण ।
प्रत्यग्रहस्ताग्रसुपल्लवोऽयं, पीनस्तनाभ्यां फलितो रराज ॥ १३

यस्याः मुखेन्दो रदरश्मिकौमुदी, स्फुरत्प्रभामण्डलहास्यमिश्रिता।
सुधारसाधारवराऽधराधरा,
मुदे न कस्मै सुभगस्य चेतसे ? ॥ १४

निगाल्य पीयूषरसं पितामहो, मरालगत्या वदनं व्यधत्त ।
तदुद्धृतं शेषमलं गृहीत्वा,
किं वा विधुं येन कलङ्कितोऽसौ ? ॥ १५

चन्द्रेण मीयेत तदीयवक्त्रं, वाङ्मात्रमेतन्न तु वास्तवं तत् ।
स्वर्भानुना गृह्यत एष चन्द्रस्तमो
निगृह्णाति मुखं हि ज्योत्स्नया ॥ १६

क्रीडातडागं मुखमेतदस्याः, नेत्रोत्पलं भ्रूयुगभृङ्गराजितम् ।
पञ्चेषुहंसस्य विलासहेतोः, किं निर्मितं यौवनकारुणेव ? ॥१७

किमुत्पले दालिमबीजसन्ततिः ?,
किं बिम्बकोशे खलु कुन्दकोरकः ।

मुक्तागणो विद्रुमभाजनाङ्कितः ?,
किं पद्मरागः स्फटिकैरलङ्कृतः ? ॥ १८

किं चन्द्रबिम्बे कलधौतकुद्मलः ?,
किं राजते रोचिषि तापनीयकम् ।
वक्त्रं सुकेश्याः दशनाधरेण,
विभ्राजते चाऽरुणगौरकान्तिः ॥ (यु.) १९

शुचिप्रवाले मधुरत्वमाश्रयेत्, सिता यदा विद्रुमरागधारिणी ।
तदाऽनुमीयेत सुलोचनाया, औपम्यमेतन्मधुराऽधरस्य ॥ २०

अनन्तपानीयजुषोऽपि वारिधेः, पयः प्रपीतं हि प्रयाति चान्तम्।
रसत्सुबालाऽधरसम्भृतो य,
उपैति सोऽन्तं न कदापि काले ॥ २१

लावण्यमास्ते लवणेषु नूनं, यत्रेव व्यक्तिस्तत एव जातिः ।
तद्व्याकृतं तद्विपरीतवर्ति, दन्तच्छदे यल्लवणत्वमात्तम् ॥२२

विनिर्मिते मन्मथभूधवस्य, भ्रुवौ तदीये धनुषी नु रम्ये ।
कटाक्षबाणावलिलक्ष्यपातने,
न वन्ध्यशून्ये विधिना शितिच्छवी ॥ २३

अलीकभूषाकरणं किमस्याः, वक्त्रं सदाऽलीकविवर्जितं च ।
दोषाकरार्थस्पृहयालु तत्किं, दोषाकरं वर्जयते नितान्तम् ॥२४

अपाङ्गसञ्चारविलोलचारुणी, विकोशितेन्दीवरपीवरद्युती ।
विलाससंस्मेरभृती तदम्बके, सरेजतुर्मोहनमन्त्रभाजी ॥ २५

कर्णोत्पलत्वेन व्रजन्ति तस्या, अपाङ्गसंवीक्षणभृत्कटाक्षाः ।
या काप्यभिख्या नयनश्रियोऽस्याः,
तां सर्ववेदी प्रविवेद नो वयम् ॥ २६

अरालकेश्याः खलु केशपाशाः, मनोभवस्येव हि चन्द्रहासः ।
जगत्त्रयस्येव जयाय कल्पितो,
नित्यं विकोशीकृत एव राजते ॥ २७

यस्याः मुखेन्दावुदिते नितान्तं, ध्वान्तं पलायावसतिं चकार ।
तस्याः सुकेश्याः खलु कुन्तलाल्यां,
यतो भयं तत्र हि तच्छरण्यम् ॥ २८

त्रिकस्थितो मञ्जुलकेशहस्तः, संशोभते स्निग्धच्छविः सुकृष्णः।
तस्याः नितम्बस्थलसन्निधान-
रक्षाकृते यः किमु नागराजः ? ॥ २९

मालतीकुसुमगुम्फितो बभावञ्जनप्रकरकेशपक्षकः ।
यामुने खलु जले हि निविष्टः,
फेनपुञ्ज इव हारशेखरः ॥ (रथोद्धता) ३०

कर्णौ किमस्याः स्मरजालिपाशौ, प्रकल्पितावंससमाश्लिषन्तौ।
नो चेत् कथं लोचनपक्षिसार्थ-
स्तत्रैव बध्येत तदीयद्रष्टुः ॥ ३१

वीणा-पीका-वेणुकलप्रणादाः, जिग्ये यया मञ्जुलनिस्वनेन ।
अतो हि कण्ठः किमजायताऽस्याः,
रेखात्रयालङ्कृतकम्बुशोभी ॥ ३२

परस्परं मत्सरिणौ यदीयौ, पीनोन्नतौ शेखरसुन्दराकृती ।
स्तनौ च मीनध्वजकुम्भिकुम्भौ,
विरेजतुः कुङ्कुमरागरङ्गितौ ॥ ३३

पुरन्दरो दारितवान्नगानां, पक्षान् यदाऽसौ गिरिराजद्वन्द्वम् ।
नष्टं भयात् तद् हृदये मृगाक्ष्याश्चकार वासं स्तनवेषधारि ॥३४

गिरिस्वभावात् कठिनं त्वतस्तत्,
वेषान्तरत्वात् मृदु बाह्यवृत्त्या ।
ह्रिया हि तत् श्याममुखं तथाऽपि,
जघान चेतांसि जनस्य रागिणः ॥ ३५

अघाटि धात्रा यदियं घनस्तनी, तत्कामितस्थानमिदं नु मन्ये ।
वक्षोजशैलोपरि यज्जनानां, भृगुप्रपातं ददते मनांसि ॥ ३६

अन्तर्दधौ यद् वयसि प्रबाल्ये, कुचद्वयं चञ्चलपद्मनेत्रा ।
समागते कामनृपे च तद्बहिः, सङ्कर्ष्यते यौवनकिङ्करेण ॥३७

नितम्बवक्षोजभरं विनिर्ममे, विधिस्तदाऽयं खलु दानलम्पटः ।
मध्यस्य निर्माणविधौ हि तस्या,
अतीवजातः कृपणो नु मन्ये ॥ ३८

वक्षोजभारादतिसन्नताङ्गी, तथा नितम्बादतिसंस्खलन्ती ।
चचाल सा मत्तगजेन्द्रगामिनी, सञ्चारिणी कुन्दलतेव रम्या ॥३९

तदीयमङ्गं किल पुष्पधन्विनः, पुरं नु मेने वरधाम शोभि ।
न चेत् कथं तत्र मनांसि यूनां,
वसन्ति नित्यं च सुनिश्चलानि ॥ ४०

यदीय बाहू नितरां बभासतुः, कफोणिविस्तीर्णसुवृत्तकूर्प्परौ ।
नखप्रभाभूषितपाणिपल्लवौ,
शाखे इव श्रीयुतकल्पशाखिनः ॥ ४१

यवालिकाऽलङ्कृतसुप्रकोष्ठौ, रेखायुतौ तौ सुतरां चकासतुः ।
अतो हि विश्वाऽभरणस्य नेमेः,
यौ पाणिपीडस्य कृते भविष्यतः ॥ ४२

गम्भीरनाभी नितरां बभाषे, वलित्रयाऽलङ्करणैव तस्याः ।
सङ्क्रीडनार्थं स्मरमानसौकसः,
सोपानयुक्ता खलु दीर्घिकेव ॥ ४३

गूढोदरेऽरोचत रोमराजी, कृष्णच्छविस्तामरसानुकारे ।
संलक्ष्यते पङ्कजमध्यसंस्थिता, द्विरेफमालेव नितान्तरम्या ॥४४

नितम्बभारं सुतरां बभार सा, यस्योपमानं खलु नास्ति सम्यक्।
दुर्गं प्रकल्प्येव मनोभवस्तमद्यापि जेतुं जगदिच्छतीदम् ॥ ४५

रम्भे इवाऽस्याः किल सुन्दरोर्वौ, सुवृत्तगौरत्वगुणप्रकृष्टौ ।
विजित्य विश्वं हि मनोभवेन,
तौ कीर्तिघाटाविव सम्प्रकल्पितौ ॥ ४६

जङ्घाद्वयं यद् ध्रुवमेतदीयं, करं गजस्येव परं जिगाय ।
ततः प्रणश्यैव करीन्द्रपार्श्वे,
स्थितश्च तत्राऽप्यऽघ एव वीक्ष्यते ॥ ४७

हेमारविन्दे इव चारुपादकावुताऽथवा काञ्चनकूर्मकाकृती ।
किं वा श्रियो वासनिवासपद्मे,
पुपोष लक्ष्मीमिति कम्रतायाः ॥ ४८

विभूषणैर्भूष्यत एष सर्वो, नारीजनो नूनमिति प्रसिद्धिः ।
किं भूषणानां प्रविभूषणाय,
विधिर्मृगाक्षीं कृतवानिवैताम् ? ॥ ४९

अकारि धात्रा यदशेषशुभ्रमादाय सा गौरतनुः ततश्च ।
तादृक्ष्यश्वेतत्वमलक्ष्यमाणो, मन्ये वरं श्यामरुचं स चक्रे ॥५०

सुखस्तनारोहकराधरावरास्तथा प्रचक्रे विधिना स्फुटा ध्रुवम् ।
तनूदरं मध्यगतं कृतं न वा,
मया न दृष्टं खलु संशयान्वितम् ॥ (वंशस्थ) ५१

बिम्बोष्ठी तुङ्गनाशा कमलनयना कुन्ददन्ता सुकेशी,
सुश्रोणी तुच्छमध्या रुचिरगमना सन्नता सुस्तनाभ्याम् ।
वामोरुर्निम्ननाभी सुभगजघना सुन्दराङ्गी च बाला,
सा कन्याऽतीवरम्या ननु नरपते ! नाम राजीमतीति ॥ ५२
(चित्रमाला)

सङ्कर्षणो रुपमुदीर्य तस्या, इति प्रकारं वचनं जजल्प चेत् ।
राजीमती नेमिजिनं वृणीते,
योगस्तडित्-तोयदयोस्तदा भवेत् ॥ ५३

इतः समुद्रं विजयं बभाषे हरिस्तथेति क्रियते जिनस्य ।
पाणिग्रहार्थे हि महो महागुणाः,
कदाऽपि नो वृद्धपराङ्मुखाः स्युः ॥ ५४

इतश्च नेमिं करिकुम्भसंश्रितं, विधाय विष्णुर्यदुसेनया वृतः ।
आतोद्यनिर्घोषरवैर्जगत्त्रयं, सम्पूरयंस्तोरणमाससाद ॥ ५५

तस्यां नगर्यां च तदाङ्गनानामालोकनाऽर्थं विविधा विचेष्टा ।
बभूवुरासां सुमनोहराणां सम्भूय मार्गान्तरसंस्थितानाम् ॥ ५६

काचिज्जहौ हारलतां स्तनाभ्यां, काचिच्च सख्यै ददयङ्कपालीम्।
काचिन्नितम्बात् स्खलितं दुकूलं,
न संजहारेति विलोकलालसा ॥ ५७

कयाचिदेकं नयनं निरञ्जितं,
कया च कान्तोऽप्यऽवधीरितो निजः ।
कया स्वबालं प्रविहाय श्वानः,
कट्यां दधे चञ्चलनेत्रया तदा ॥ ५८

काचिल्ललाटे वरपत्रवल्लरीं, चक्रेऽथ गण्डे तिलकं नितम्बिनी ।
काचिच्च लीलागमनाऽलसाऽपि,
क्षामोदरी शीघ्रगतिं ततान ॥ ५९

काचिद् गवाक्षं नवचन्द्रशोभिनं, वक्त्रेण चक्रे परमोज्ज्वलेन ।
काचिद् विशालेक्षणतोरणस्त्रजं,
बबन्ध हास्यैः कुसुमोत्करं तथा ॥ ६०

काचिज्जलार्द्रं निजकेशपाशं, स्नेहाद् गलद्बाष्पमिमं न दध्रे ।
काचिन्नखाङ्कं न जुगोप लीलया,
विलोकमाना यदुपुङ्गवं जिनम् ॥ ६१

एवं च नेमिः पुरहूतसंयुतो, यावद् गृहं प्राप सदौग्रसेनम् ।
तावत् पशून्वाटकसन्निरुद्धान्,
ददर्श कारुण्यनिधिर्भयद्रुतान् ॥ ६२

पप्रच्छ सूतं किल केन हेतुना, धृता इमे प्राणिगणा अनेकशः ?।
विवाहकार्ये तव सोऽब्रवीदिदं,
विचिन्तयामास ततः स्वचेतसि ॥ ६३

अहो ! दुरन्तो विषयाऽभिलाषस्तथाऽप्यहो ! मोहनरेन्द्रचेष्टा ।
अहो ! विरुद्धा खलकर्मणां गतिरहो ! महामूढजनस्वभावः ॥६४

तथाऽप्यहो ! वैरिगणः प्रमादः, कष्टं महत्पूर्वभवोपसञ्चितम् ।
अहो ! हि मारो नरमारणोद्यतस्ततो बताऽज्ञानविजृम्भितं च॥६५

अयं हि रागोरगदृष्टिपातस्तथेदृशाऽहो ! महती विडम्बना ।
अहो ! भवः शाश्वतचारकाशे
यतो स्थितिर्भूरितराऽशुभायते ॥ ६६

एवं जिनश्चेतसि चिन्तयन् सन्, ध्यानेन निष्कम्प इवाऽद्रिराजः।
प्रियंवदा राजसुतां जगाद, वरस्रजं धारय सावधाना ॥ ६७

श्रीनेमिः सखिवरणाय कान्त एष-
स्त्रैलोक्यप्रचिततरावदातकीर्तिः ।
त्वं राजीमति ! वरवैभवाऽसि धन्या,
यस्यास्ते पतिरयमीश्वरोऽधिनाथः ॥ (प्रहर्षिणी) ६८

त्वं बाले ! विकसितपद्मचम्पकाभा,
कान्तः श्रीहसिततमालमेघवर्णः ।
तद्योगे ननु भविता मिथोऽप्यभिख्या,
श्यामाद्रेः शिरसि यथेव चन्द्रज्योत्स्ना ॥ (प्रहर्षिणी) ६९

आल्यस्मासु चिरकृतं न हापयेथाः,
प्रेमाऽनेन प्रियतमेन सम्प्रयुक्ता ।

अद्याऽस्मन्मनसि सुवाञ्छितं प्रजातं,
तुष्टस्ते शुभमतिपूजितो जिनेशः ॥ (प्रहर्षिणी) ७०

इत्येवं सखिनिकरे विभाषमाणे, एतस्याः नयनमवाममाचकम्पे।
तत्कालं मुकुलितनेत्रया तयाऽपि,
सख्योघस्तदनु तथा च सम्बभाषे ॥ (प्रहर्षिणी) ७१

निश्रेयसाप प्रनिबर्हणं क्वचित् संवालयामास रथं स पश्चात् ।
वितीर्य दानं स च वार्षिकं जिनो,
दीक्षां ललौ रैवतकाननेऽस्मिन् ॥ ७२

अथ विरह-धनञ्जयाऽऽकुला सा,
बहु विललाप ततो मुमूर्छबाला ।
घनतरशिशिरोपचारकारै-
रथ खलु तामवबोधयन्ति सख्यः ॥ (पुष्पिताग्रा) ७३

अतिशयतरमीरिता नताङ्गी, पुनरपि मोहमवाप राजकन्या ।
विदरितमिलितालिवारवाग्भिरपि
न विबोधकरं तथाऽपि लेभे ॥ (पुष्पिताग्रा) ७४

कुवलयदलकोमलां च बालां, कथमिह मामबलां च रागमुग्धाम्।
कुलिशकठिननेमिनाथहस्ते,
शठतर ! पातयसि स्म पुण्डरीक ! ॥ (पुष्पिताग्रा) ७५

इह पिकरटन-प्रमेघनाद-प्लवशिखि-चातककूजितं विश्रुत्य ।
यदि न चयति ते चिरार्द्रभावं,
मन इति किं करवाणि ? नेमिनाथ ! ॥ (पुष्पिताग्रा) ७६

अपि च कुटज-नीप-कुन्दकाख्याः
विकसित-पुष्पसमूहजातशोभाः ।

तदनु च पथिकाः गृहेषु जग्मुः,
सखि ! न च सुन्दरवल्लभः समेतः ॥ (पुष्पिताग्रा) ७७

इयं शिरीषादपि सौकुमारी, स एव वज्रादतिसङ्कठोरः ।
यदेतयोर्योजनसंविधाने,
तदा विधे ! त्वां न घृणा रुरोध ॥ (इन्द्रवज्रा) ७८

(द्रुतविलम्बितम्)

निपतितं मम मूर्ध्नि यथेदृशं,
सपदि तादृशमाशु पतिष्यति ।
शिरसि चेत् तव कर्मवशाद्विधे !
त्यजसि तां खलु शीघ्रमहं युताम् ॥ ७९

विधिरसौ न निषेधति कुत्रचित्,
नयविदः प्रवदन्ति सुतार्किकाः ।
प्रणयिनं प्रतिषिध्य च मामकं,
कथमहो ! अभिधा तव सार्थका ? ॥ ८०

अयि विधे ! किमकारि स वल्लभः, सकलरागवितानविवर्जितः।
कथमहं न कृता बत तादृशी, सदृशयोगयुतेः सुखसन्ततिः ॥८१

पतति दुःखकरो हत दुर्विधिर्बलवतः प्रविहाय वशाजने ।
हिममपि प्रतिषिध्य महाद्रुमान्
कमलिनीमबलामभिप्लुष्यति ॥ ८२

सखि ! पिधेहि विधेर्नयनद्वयं, कमपि कूटघटं प्रविघट्य सः ।
यदि न पश्यति तं प्रियमानये,
बहु विलुभ्य गिरेः शिरसः स्वयम् ॥ ८३

अयि ! कठोरकुकर्मणि कर्मठः, परनिकृन्तनमर्मणि कर्मठः ।
अखिलसौख्यमितद्रुविशोषको,
विधिरसौ किल केन विनिर्मितः ? ॥ ८४

निखिलधामवतां धुरि तिष्ठतो, मम प्रियस्य विवाहमपीच्छतः।
सपदि वारयता भवता त्वया,
वद सुराधम ! किं समुपार्जितम् ? ॥ ८५

विधिरसौ परिघः परिकथ्यतां, न पुनरेष जगत्प्रविधायकः ।
हृदि निविश्य प्रियस्य दयाछलात्,
प्रवलनाय मतिं समकारयत् ॥ ८६

न हि मया तव किञ्चिदुपाहृतं, न च कृता तव मानविखण्डना।
अथ च कार्यविधिर्न च नाशितः,
कथमहं वनिताऽपि विडम्बिता ? ॥ ८७

स्वकृतकर्म न वेत्सि यथा त्वया,
निजसुता किमकामि स्मरं स्वयम् ।
प्रणयिनं परकीयमपाहरन् सकलकर्मकरेति न लज्जसे ? ॥८८

यदि गतः खलु नेमिजिनेश्वरः, प्रियतमो मयि मोहविवर्जितः ।
तदनु किं सुखमाशु गतं मम,
चिरतरं निजधाम विमुच्य च ॥ ८९

मलयमारुत–कोकिल–चन्द्रमःप्रभृतयः प्रतिकुलविधायकाः ।
इह भवन्त्यनुकूलप्रदायिनो,
विधिकृतं न हि केन निवार्यते ? ॥ ९०

विधुरयं विधुरं कृतवानलं यदिदमेव हि तस्य कुलोचितम् ।
कुटिललक्ष्मभृतामशुभायती,
मतिरहो ! परसौख्यनिकृन्तिनी ॥ ९१

कुमुदबान्धव एष उदीरितः, सुनिपुणैरिदमेव च सूनृतम् ।
कुमुदबान्धवतामनुकारयन्, विरहिणी जनदाघकरैः करैः ॥९२

इममनाथवधूव्रजमर्दयन्, हिमरुचिर्बहुपापकलङ्कितः ।
अहनि तेन भ्रमन्नभिलज्जते, तदनु रात्रिमुखे चरतीव सः ॥९३

अमृतसूः प्रथमं यदि विस्तृतस्त्वमसि किङ्करवर्गमृतप्रसूः ।
विषसहोदरता सफलीकृता, जलधिजन्म मुधा गतमेव ते ॥९४

हिमकरं सखि ! हिंसितहिंसकं, खरकरं कथयेति मदीरितम् ।
अयि ! हि किं कुरुषे बहुपातकं,
त्वमसि किं मम वल्लभसङ्गतः ? ॥ ९५

सखि ! हरिं प्रतिबोधय मद्गिरा,
कथमहो ! उदपादि त्वया विधुः ।
वृजिनव्यूहनिरूहकदर्थितः, प्रथितकृष्णतनुर्भवसीत्यतः ॥ ९६

अपि विधुन्तुदसीति विधुन्तुद-
स्त्वमिह नासि परं तु विधुन्तुदः ।
अमुमतीव परासनकारणं शशभृतं विनिगल्य विमुक्तवान् ॥९७

त्वमपि किं कुरुषे मयि नेदृशं, जिनवरस्तु वरोऽप्यकरोदिदम् ।
यदि निजोऽपि भजेदतिवैरितां,
तदपरस्य परस्य हि का कथा ? ॥ ९८

जाने नेमिः सखि ! शिखरितः, प्राप्त एवाऽस्मदीये,
गेहे स्वप्ने तदनु च मया, लज्जया भाषितोनो ।
व्रीडां यावद् हृदयजनितां, मोक्तुमत्युद्यताऽहं
क्रूरो दैवः प्रियसुखकरीं, तां प्रमीलां जहार ॥ (मन्दाक्रान्ता)९९

राजीमती रात्रिषु नाभसीषु,
दीर्घा सुनिश्वासविवर्णिताऽधरा ।
रहस्युपालम्भवचस्तु नेमये,
ध्रुवं बभाषे स्वयमेव केवलम् ॥ (उपजाति) १००

अहं तु जाने नितरां मदीयः, प्राणेश्वरो नैव परस्य कस्य ।
त्वं सर्ववेदी भवसीति नाथ !,
कथं न जानासि मदीयचित्तम् ? ॥ १०१

(द्रुतविलम्बितम्)
तव वपुर्मलिनं बहिरेव यत्, तदखिलं जनताऽवगतं च माम् ।
प्रविजहौ तनुदोषमृते त्वतो,
मनसि मे मलिनं च बहिःस्थितम् ॥ १०२

जलमुचा जगदार्द्रतं कृतं, घनतरं प्रवितीर्य जलं नवम् ।
न पुनरस्य प्रियस्य ध्रुवं मन-
स्तिलतुषस्य त्रिभागतयाऽऽर्द्रितम् ॥ १०३

नवभवेषु स एव मया कृतः, सहचरः प्रविहाय परान् जनान् ।
इह पराभवपात्रमहं कृता,
न खलताकरणं प्रिय ! साम्प्रतम् ? ॥ १०४

अहह नाथ ! गतो यदि तोरणाद्, मृगवधमनुकम्प्य दयान्वितः।
निजवधूं विरहय्य भवादृशां,
न तु कृतं हि त्वया शुभमात्मना ॥ १०५

वदसि देव ! विचो हि यदीदृशं, नियतिभावविवादवियुक्तकम्।
ममकृतं त्यजनं नियतिश्रितं,
तदपि चारुतरं न भवादृशाम् ॥ १०६

सखि ! बभूव निरुत्सवमाधवो, विरहदुःखकरो ननु माधवः ।
किमपि भूषणमद्य न रोचते, विरहपावक एष निरोधते ॥१०७

अविधवां विधवां कथयन्ति मां,
त्वयि सति स्मितलोचन ! यज्जनः ।
दहति गात्रलतां च यथा मम,
तव मनो दहति स्म कथं न तत् ? ॥ १०८

इह हि तेन च सर्वमरोचकं, प्रियतमेन ममाऽद्य विनिर्मितम् ।
बत तथाऽपि हि तत्र रुचिः कथं ?,
न खलु वेद्मि चरित्रममुष्य वा ॥ १०९

विरहपावकदीपितमद्धृदः, सखि ! ननाश न धृष्टतरोऽलसः ।
न च कदाऽपि शमाऽमृतशीतले,
स्वहृदि वेशमकारयदाऽशुभे ॥ ११०

न कुचहारमणी न च कुण्डले, वसनकङ्कणकान्तिगणस्रजः ।
अपजहार स एव न तस्करः,
सखि ! मुमोष मनो मम तद्भृतम् ॥ १११

भूषां भज त्यज जिनं च नवं वृणीष्व,
कान्तं वरं हि किमनेन सुनिष्ठुरेण ।
आलीरिताह वरराजसुतेति मुग्धा,
नेमिः श्रृणोति हृदिगः सखि मा प्रजल्प ॥ (वसन्ततिलका)११२

यो मातरिश्वा शुभरैवताद्रेः,
समागतः प्राणप्रियं विस्पृश्य ।
आश्लिष्यते सोऽपि तया सुमुग्धया,
संयोगजं योगगुणं विचिन्त्य ॥ (उपजाति) ११३

एवं स्मरव्याधिवियोगसङ्कुला, विलप्य कन्या निजगाद चालीः ।
गतो हि नेमिर्ननु नाऽऽगतोऽसौ,
भद्रं च भूयात् सखि ! कान्तनेमये ॥ (उपजाति) ११४

सख्यस्तदानीमिति सम्बभाषुः, नेमिः स्म सङ्क्रामयते प्रव्रज्याम्।
राजीमती भर्तृपथाऽभिलाषिणी,
वक्तुं तदैवं सततं प्रचक्रमे ॥ ११५

त्वं मित्राशु करोत्करं हिमसमं कुर्यास्त्वमेवं धरे !,
काठिन्यं त्यज मारुत ! त्वमपि च स्वेदप्रणोदी भव ।
त्वं क्रीडाचल ! मार्गसुन्दरतरं दद्याः यतो वल्लभः,
श्रीनेमिर्नवनीतकोमलतनुर्दीक्षां समालिङ्गते ॥(शा.वि.) ११६

राजीमती नेमिजिनस्य पार्श्वे,
दीक्षां गृहीत्वा समुपार्ज्य केवलम् ।
तौ दम्पती प्रापतुरव्ययं पदं,
देयात् स नेमिः श्रियमेव मञ्जुलाम् ॥ (उपजातिः) ११७

पू.आ.श्री सोमसुन्दरसूरिविरचितम्

स्वमनोविज्ञप्तिगर्भितम्

## ५५. ॥ श्रीनेमिजिनस्तवनम् ॥

(चन्द्रलेखा)

जय सिरिनेमिजिणंदचन्द ! वंदिअपयसुरनर !,
भविअणजणमणवंछिअपूरण ! पहु सरतरु ।
हरिकुलगयणविभासभाणु जय जय सिरिनाह !,
जय जय तिहुअणकामकुंभ जय पुन्नपवाह ॥ १

रेवयगिरिवरतित्थरायसिरि मउडसमाण !,
जय जय दुज्जय मोहजोहमयनिज्जिअमाण ! ।
दुक्खदवानलसजलमेह निअदेहपहाभर-
तज्जिय कज्जल कसिणकाय ! जय जय जणसुहकर ! ॥ २

सामीय सिवपुरनयरनाह ! असिरण जणसिरण !,
भवतरुभंजण ! अंतरंगरिउदलबलगंजण ! ।
करुणासायर ! भुवणराय ! अवधारु सामी !,
वीनती कर जोडि दोइ करुं निअसिरनामी ॥ ३

पढम निगोअ अणाइ - अणंत ओसप्पिणि वसिउ,
जम्मण-मरणिइं सयललोअ सामी ! मइं फसिउ ।
बायरआदिनिगोदमज्झि रहिउ काल अणंत,
छेयण-भेयण-ताव-सीय दुहकोडि सहंत ॥ ४

विवहारिइं कह कहवि पत्त पुढवी जलण,
जोणी लक्ख सत्त सत्त हउं भमीउ पवण ।

वणसइ पत्त–अणंत माहि दस–चउदसलक्खा,
बि–ति–चउरिंदी–विगलि लक्ख जोणी दो दो संखा ॥ ५

भमीउ काल असंख – संख तुह आणविहीणु,
दुक्ख असंख सहंत तत्थ भुवणत्तयि दीणु ।
जल–थल–नहचर उरग–सप्पर भुअपरि तिरीया गयि,
बंधण–ताडण–वहणदुक्ख अणुहूअ संखागय ॥ ६

रयणपहाई य नरय सत्ति हउं भमीउ रंक,
तुह आणा विणा जोणि लक्ख चउ चउ गय संक ।
भवणवई–वाण–जोसिमज्झि वेमाणीयसुरभवि,
न हि चउलक्खा जीव जोणि साया सुह कत्थ वि ॥ ७

भरहेरवय–विदेह पंचदस कम्महभूमिइं,
जिणवरदेव–सुसाहु–धम्म लब्भइ सुह कम्मिइं ।
अंतरदीव छपन्न तीस सुरभोग समाणा,
जिणमयि कहीअ अकम्मभूमि लहीइं सुह दाणा ॥ ८

चउदस लक्खा जीवजोणि हउं नरभवि सहीउ,
इणि परि जीवहं जोणि लक्ख चउरासी भमीउ ।
पूरिअ पुग्गल वारऽणंत सामी मइं दुहभरि,
सुकय पसाइं दिट्ठ देव सिरिरेवयगिरि सिरि ॥ ९

वस्तु :–
तिजयसामीय ! तिजयसामीय ! निसुणि जिणनाह !,
चउगइ भवि इम भमिउ जीव जोणि हउं लक्ख चउरासीय ।
छुह–तण्हा–जम्म–जर–मरण रासिइं दुक्खाण पासीय,

पूरिअ चऊदरज्ज इम सामी ! वार अणंत,
भमतां भायगि भेटीउ भवभंजण भगवंत ॥ १०

भाषा : -
हिव हउं जिम नव - नव रूप वेसि,
लही बायर सुहम देसप्पएसि ।
जेहिं अणुबद्धउ भवमज्झारि,
भमीउ भवउदहि अणोरपारि ॥ ११

नवि पामिउ जहं कह वि पार,
हउं वीनवउं सामी तीहं पयार ।
मूल पगई य अट्ठकम्म हुंति,
भेया पुण अडवन सय लहंति ॥ १२

नाणावरणीय-दंसण-वेअ कम्म,
पण-नव-दुह-उत्तर- पगइ मम्म ।
थिइ तीस कोडाकोडि उदहि जिट्ठ,
ईयरेणिग बार मुहुत्त दिट्ठ ॥ १३

जिव वागुरी बांधउ रहइ जीव,
तिम मोहणि बद्धउ रहिअ जीव ।
ठिइ अपर कोडाकोडि सतरि देव,
परमेसर अंतमुहुत्त लेवि ॥ १४

अडवीस उत्तरपगइ नाह !, इक्किक्कादिइं दुह दुसह जाहं ।
नवसयपंचाणुभंग जेअ, दिइं उदयिइं दुक्ख अणंता तेअ ॥१५

देवाईय चउगइ आउकम्म,
जिअ पामइं निअ-निअ उदयिं जम्म ।

तीस–तिगहिअ सायर जिट्ठ आय,
जहन्न मुहुत्तिइं अंति जाइ ॥ १६

नामकम्मिइं उत्तरपगइ जोइ, इगसय वलि तिन्नि अ दुन्निगोइ ।
कोडाकोडि ठिइ तीससागराण,
बीआ अड अन्तमुहुत्त जाणि ॥ १७

पंचुतरपगई य अंतराय, दाणाई य वीरिअ अंतराय ।
परमा ठिइ कोडाकोडि तीस,
सागर बिअ अंतमुहुत्ति सीस ॥ १८

भमी काल अणंतु एहं पसाइ,
आविउ नरभवि हउं कहकहवि ताय ।
बहु पुन्न पसाइं अज्ज नाह !,
मइं दीठउ रेवयगिरिसणाह ॥ १९

वस्तु :–
भवह सायरि भवह सायरि अट्ठकम्मेहिं,
दुक्ख अणंता इम सहीय, भमीय नाह ! तु वल्लह विण दिट्ठउ,
तत्थ य करिअ पमाय घण बहुअ वार तुह आणभट्ठउ ।
चिहुं कसाए ओलविउ, चउगइ भव मज्झारि ।
हिव तूं सामी ओलिखिउ चउगइगमण निवारि ॥ २०

भाषा :–
सहजि सलूणा सोहग सुंदर, राव करुं सिरिनेमिजिणेसर ! ।
तित्थेसर भयहरण जगजणमणचिंतीयचिंतामणि
भवियकमलपडिबोहणदिणमणि तिहूयणतारणजाण ॥ २१

अंतरंगवयरीडे पामी जिम रहउं रोलवीउ सामी ।
तिम जगगुरु अवधारि विवहरूवि कीय कम्म कुललिइं ।
दुह भंडागर दंड पमायिइं भमी नइ भवचक्कि ॥ २२

भवपुरि विनडिउ मोहनरेसारि,
बहूअ परिइं तुह विण अलवेसरि ।
चउगइ चउपथमाहि सुजन-घर-सुत हउं वनितानइ ।
नेह बंध निबंधीयउ चउगइनइ, पालिउ भव दुह चारि ॥ २३

विसय रसिइं हउं मूढ विलूधउ, पंचपयारि भववारणि रूधउ ।
लीधउ दुह भंडार राग-दोसि हउं जगहवदीउ ।
जीतु असिरण भमीउ मयउ, रंक परिइं संसार ॥ २४

तुह सासण वरयो अविहूणइ दुरुत्तर मणि भवजलहि लही नइ,
पामीय दुक्ख अणंत, तिहुयणि सुरनरमाणविहंडण ।
सिवसुखसंपय मइबलभंजण, दुज्जयइंदिअ चराड ॥ २५

सच्छाहिव तूं सरसि छतइ पहु जानु सिवपुरपंथि लहीहउं,
लुसिउह भवरण्णे सुकय हीणदीणु भव पंकि ।
खुतु पाप करंत निसंक, कायर भव बीहंत ॥ २६

अडवडीयां आधार जिनेसर, दुत्थिअ जण पीहर परमेसर,
भावठि भंजण देव ! तूं करुणारस सायर सामी ।
सिरणागय रक्खण मइं पामी राखि राखि जगनाह ! ॥ २७

अंतरंग अरिदल निव्वारण कोइ न रक्खण तिहुअणि तूं विण,
समरथ साहस धीर तूं जगवच्छल हउं निरधार ।
आयर करि मूं हिव करि सार, वंछीय सुह दायार ॥ २८

वस्तु :-

नेमि जिणवर नेमि जिणवर भुवण जण ताय !,
निलुप्पल सरिसतणु अमिअवाणि गय ललीय गामिअ,
नव जुव्वणि मयणजिअ, मोहमल्लबल हेलि नामिअ।
वयरीयडे तुह आण विण रोलिउ हउ भवमाहि,
तूं ठाकुर मइ पामीउ वारि न अरिदललीह ॥ २९

भाषा :-

हम हउं भवसायर मज्झारे, भमीउ दुक्ख अणंत पयारे,
कम्मपसाइ अतिघणू ए।
तूं तिहुअणजणतारणदेव !, नयणे दीठउ सामि हेव,
तूं मनहरखिइं गहगहिउं ए ॥ ३०

आज सुधन दिन धन सुविहाणउं,
धन ए पहुर सुखिण खिण जाणउं,
माणउ सुखसंपद सयल ए।
आज सुकय कीय कलीउं नाह !, ओल्हाणु मुझ भवनु दाह।
नाह ! पणासिय पावभर सयल ए ॥ ३१

अमीयरसायण वूठउ मेह, सुरतरु फलीउ आंगणि गेह,
कामकुंभ मुझ करि चडिउं ए।
कामगवी आवी घरबारि, फलीया सयल मनोरथ पारि,
सारचिंतामणि करि चडिउं ए ॥ ३२

आज जिनेसर एह ज मारुं, सफल हूउ माणसनुं सारुं,
पार भवोदहि पामीउं ए।

चउदरयण नव निहि घरि आज, पामीउं त्रिभुवन केरुं राज,
आज सबल पहु पामीउं ए ॥ ३३

तिहुअणि निरुवम तीरथ उ, भमरुली गिरि गुरुउ गिरिनार ।
तसु सिरि भुवणदिणेसर उ, भमरुली सिरि मुनिसुंदर सार ॥३४

यादव वर कुल नहयल उ, भमरुली पयड विसाल दिणेस ।
सीस लेस नीय करजोडि उ,
भमरुली विनवइ नेमि जिणेस ॥ ३५

जम्म-मरणिइं इणि परि उ, भमरुली पूरिअ लोअ असेस ।
फरिसि चऊदइ रज्जमइं उ, भमरुली वारणंत देस पएसि ॥३६

पुग्गल परिअट पूरिआ उ, भमरुली आठइ वार अणंत ।
भमतां मइं भवसायर उ, भमरुली लाधु कह वि न अन्त ॥३७

भमीय भमी हउं ऊसन्नउ उ, भमरुली आवि तुह पाय हेव ।
माय बाप तूं बंधव उ, भमरुली तुं गुरु ठाकुर देव ॥ ३८

तूं चिंतामणि सुरतरु उ, भमरुली चउगइ गमण मूं वारि ।
राज-रिद्धि-धण-कण-रयण उ,
भणरुली मांग्गउ रमणि न सार ॥ ३९

बोधिबीज मझ अविचल उ, भमरुली देजे निय पयसेव ।
इम सामी जे जीनवरू तु उ,
भमरुली भविअण भावि नमेवि ॥ ४०

पामइ सुरनर संपद उ, भमरुली सिवसुख भोग रसाल ! ।
आठइ सिद्धि वसइं घरि उ, भमरुली अविहड मंगल माल ॥ ४१

वस्तुः-
भत्ति पूरिअ भत्ति पूरिअ मणह आणंदि,
सिरि रेवयगिरिमण्डणु तित्थराय सिरि नेमिजिणवर,
मइं सामी इम वीनविउ, आलमाल नयणे जिणेसर ।
राज-रिद्धि-धण-कण-रमणि-कंचण-रयण-न किं पि,
मागउं भवि-भवि बोहिबीय तुह पयसेवा पंति ॥ ४२

कलशः-
ईय रेवयगिरि सीरि सुंदर-तिलय नेमि जिणेसरं,
वीनवइं अणुदिण जेअ भविअण पणयसव्वसुरेसरं ।
तवगच्छसुंदरसोमसुंदरसूरिवन्निअसंपयं,
सिवरमणिपिम्मह हीययवल्लह लहइं ते सुह सासयं ॥ ४३

पू.आ.श्री देवसूरिविरचितम्

उज्जयन्तशैलमण्डन-

## ५६. ॥ श्रीनेमिनाथस्तोत्रम् ॥

(गाहा)

जायवकुलसरवररायहंस, हंसुज्जलएहि चरिएहिं ।
तुह नेमिनाहं सिएहिं मज्झ खिज्जंतु कम्माइं ॥ १

कारुन्नामयसायर ! सायरसुररायवंदियकमग ! ।
उज्जितसेलमंडण ! विहंडणं कुणसु कम्माणं ॥ २

तुह पायपउमजुयलं सुमरंतो नाह ! मज्झ मणभमरो ।
इत्तिय कालं दुहिओ अहेसि संपयं सुही होइ ॥ ३

मम लोयणेहि सामी ! संपयं मन्नेमि निज्जियं भुवणं ।
तुह वयणामयकलसे कुवलयलीलाइयं जेण ॥ ४

